च ॥ पंच पचं विस्तृतमास्यमस्य ॥ यद्वा ॥ मुखपादाश्च पंचास्यनी वयस्याप्त्पृष्ठं मुखत्वातः ॥ हरिणी पिंगले अप्त्याणीयस्याः
बऊ ब्रीहग विति षच् ॥ केसराः स्कंधवाला संत्यस्य अतइति ॥ केसरी तुरगे सिंहे पुंनागे नागा केसरे ॥ केचित्वालस्यो
प्प ॥ मध्यमाकुकेनवायुनाः ॥ यं तस्ह हिंसा मां सं दौरपृ ॥ ठरन्ति अचइति ॥ हरीश्च दाकवाताश्च स्तु कभेकाय

॥ सिंहो मृगेंद्रः पंचास्यो हर्यक्षः केसरी हरिः ॥ शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ॥ १ ॥

मादिषु ॥ कपौ सिंहे हरे जसे शेषाके लोकांतरेपु मानमयूखेपिंगहरितो भद ॥ शादयति ॥ प्रहिंसायां ॥ स्वार्थे णिच्
द्वि षु ॥ ह्ल यते ॥ हृद्वभ्यरितापभ्अंतर्भावितण्यर्थः ॥ बाहुल काद्धक ॥ शारस्या सो हृलस्य ॥ यद्वा ॥ मृगाते पिंजाघ
ल च बाऊ ल का हृ का दूहो ॥ शार्दूलो राक्षसं तरे व्याघ्रे चपभ्भेदे च सत्तमे भूवरे तर स्थिते ॥ द्वैवरणी वीयते ॥ द्वयुगतो
वाऊलकात्तप ॥ द्वै पंचमस्त्यस्य अतइति घ्राणं धीपादाने ॥ व्यांडिघ्रातेश्च जाविति ॥ यद्वा ॥ आतश्चोपसर्गे इ
तिकः ॥ पाघ्रेति घ्राणो घः संज्ञा ॥ मानिति जिघ्रि धातः ॥ व्याघ्रस्यात्पुंसी शार्दूले वरकै रेंड करंजयोः ॥ ॥ ॥

अ॰ टी॰

श्रेष्ठे नरस्तुत्यमस्तकं कार्यं क्रियो मिति॥ श्री॥ शिवाय इति ख्यातस्य॥ तरंगा तिमार्गविरुद्धे रोगति॥ त्विषादिं सायां॥ भितभूपति दुःमत
गमस्ति॥ अदभद्ररोगी॥ स्तुच्छंतुः॥ आवायइतिख्यातस्य तत्पवइतिख्यातस्यौत्पत्तौ॥ ॥१॥ करं श्रेष्ठमादं दंति॥ अन्येभ्यो॥ पीति
ड ः वराहे नारोगे कांकि रोमघेमुस्ते गिरौ बितिहेमचंद्रः॥ सवनं॥ पृड़ आरोगगर्भविमोचने॥ संपदादिसुखं नं श्वसनं करो
ति र ज्ञौ देति तालव्यास्वकररांशवइति त्राभेदः॥ स्तु कोस्यस्य खर रोमत्वात्॥ यद्वा॥ स्तु करोति॥ राशते पेति कः॥
यद्वा॥ स्तु इतिध्वनिं करोति अच्॥ घर्षति॥ घृष संघर्षे क्तिन्॥ घृष्टिः स्त्री॥ घघर्षरोगस्यवर्ष विल्लु क्रोंताम्रवाकि रावित्ति

वराहः स्तूकरो घृष्टिः कोलः पोत्री किरः किटिः॥ दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि॥ २१॥

॥विभ्व॥ कोलेति पीनत्वात्॥ कुल संस्त्याने॥ अच्॥ यद्वा॥ कोलं यं गात्य त्र दल श्वेतिघञ् कोलो भेलक लतुसंगेः कय
ष्पां चित्र कोकिरो॥ कोलं च बदरे कोला पिप्पल्यां॥ न्यभे पजे इतिदेमः॥ पोत्रं मुखाग्नं मस्य अत इति॥ किरति क्षि
त्नं पेडगुपथेतिकः॥ किरिति पाठे बाहुल्यकाकिं केटति क्षि टगतो इगुपधात् कित्तु वत्॥ किटतिइतिमुकुटाद्यास्तुः
किटेस्तोरुहादित्वाभावात्॥ दंष्ट्रास्यस्य स्त्रीत्वादीनिः॥ घोराणा नासास्य स्त्रीत्वादिस्तब्धानि रोमाणि यस्य॥ कुडति कुडव
नत्वे॥ अनि तिमुकुटः॥ नमा कुड्या स दित्वा॥ कुलाग्रसंगात्॥ कुंडनं॥ घञ्॥ क्रोडोस्यस्या अस्त्री घच्॥ भुवंदा

कंपते।कपिचलते॥कुं द्वियैर्मितलो पश्चेती।गणक पिर्नसिंह के शाखामृगे च मधुसूदने इति विश्वमेदिन्यौ।प्लवनं प्लुङ् गतौ ल्युट् तेन
प्लवेन गच्छति॥अन्येष्वपीति डः॥गमश्चेति खच् खच्च डिद्वा॥प्लुङ् गतौ विलम्ब्य डेरे फ वदपि प्लवगः कपि भेकयोः॥अर्क
मूले चेति हेमः॥शाखाचारी मृगः पशुः शाकपार्थिवादिः वलियुक्तं मुखमस्य च मर्कति मर्क सौत्रो धातुरुतड रणशकादि
भ्योऽटन्॥मुकुटस्तु मर्के सौत्राज्ज्यन्या चूरणः दिक ल्पितरणो च दाकादिभ्योऽटन्निति साद्॥तन्निंत्यं मर्कशब्दो रास्त्रिकत्वाभावात्
यदपि न्नियते॥जटमर्कटावितिस्फुटोऽटन्नकारस्थांतादेशाइत्युक्तं॥तदपि निर्मूलं कौत्वाद्रूपेस्सं वनेभवं फजारि

कपिप्लवंगप्लवगशाखामृगवलीमुखाः॥मर्कटो वानरः कीशो वनौका अथ भल्लुके॥ ॥ अरण्यवानं रातिराज्ञा
राने।अतो नुपेति कः॥वानं वा गत्यादेसंपदादि क्विप्॥विगमनं पीत्यगाति वालकं नृपेभव।वा किं चित्र्रो वा कीडतिस्य
हृमीहेड इत्यार्थे॥मूलविभुजातिः॥यहक स्सवाघोरत्पं अतइञ्॥किर्हि नु माली शापस्यावनमोकोस्यनव॥भलते भल
हिंसायां॥बाहुलकादुः संज्ञायां कन्॥ऊल्वकादित्वादिर्घमध्योपि भल्लु मुकुटेन भ्रूकादयश्चेति स्वन्मुक्तं तद्भंकाल्व
लदत्तादौ नदृश्यते॥भजती त्यूक्ति स्वामी मुकुटयोश्चिंत्य॥भाल यते भल आभंडने॥चुरादिरानुकुस्मीयः॥भालय
तीति मुकुटश्चिंत्य॥भल्लुको भल्लुको भल्ल इत्युल्ककादयश्च मञतिफकणोन्तमः॥प्रज्ञाद्यणि भाल्लुको भाल्लू कश्च
३

अ. टि. टी. ऋच्छोति ॥ ऋच्छ हिंसायां ॥ अच्छ ॥ ऋक्षः पर्वतभेदे स्यात् भल्लूके शोणके पुमान् ॥ कृतवेधके न्यलिंगं नक्षत्रेवन
२७६ पुंसकं ऋच्छतीति स्वामी चिंत्य ॥ ऋक्षेः सौत्रादिकलात् ॥ अच्छाभिमुख्ये ॥ भल्लभते ॥ अच्छ भल्लती ॥ तुक्तिः स्वामी सु
कुटयो श्चिंत्यसंघातविराद्धी तमिदं नाम ॥ अच्छः स्फटिकभल्लूकनिर्मलकर्मण्ययं अभिमुख्ये चत्वारि भालुक इति ख्या
गच्छति ॥ गमल्लगतौ ॥ भ्रमंतातु ॥ स्वार्थिकः ॥ पठ गंडति मंडतो भवति ॥ गडि वदनैकदेशे ॥ शरकुल गंडकः पुंसि खड्गे

ऋक्षाच्छभल्लभल्लूका गंडके खड्गखड्गिनौ ॥

स्यात् संख्याविद्याप्रभेदयोः ॥ अवच्छेदं तराये च गंडकी सरीदंतरे इति विश्वमेदिन्यौ ॥ खडति भिनत्ति खडि भेदने स्थौ
८७ पुख्वुभिध्यः ॥ किदिरात् खड्गः ॥ गंडकस्यांगा सिवाक्रमेदेषु गंडके ॥ खड्गोऽस्त्यस्य इति खड्गी ना ॥ गंडकेस
ध्रुवोऽपि खड्गधारे त्रिषु ॥ त्रीणि गंडस्य ॥ तस्य ॥ ओलुंड निर्गंके ॥ लुंडू संश्लेषणे इगुपधेति कः ॥ ॥ राम २७६

डलयोरेकत्वं॥आप्नोति॥आप्लृ व्याप्तौ॥अच्च॥तुलस्यासौ वा पश्च॥ यङ॥ लुड्यते॥लुड विलोडने॥ निलाघ
ञ॥लुलावि लोडिता आपो येन॥ लुल विमर्दने इति सौत्रो धातुर्वा॥अंतस्थपकारांतपाठे बाकुल कालाय
द प्रत्ययः॥कलिकः पिलम्पः आपइति मुकुट लिखितं तच्च सुज्वलदत्ताद्दिष्टुन पत्रपामः॥ यङ॥ अमते
अपगतौ॥अच्च॥तुलस्यासौ अयश्च॥मद्यति॥मद्यते वा॥मद पूजायां॥अविमह्योष्टिषच॥ यङ॥ मंड

लुलायो महिषो वाहद्विषत्कासरसैरिभाः॥६॥

ते॥मदि कृच्छ्रे॥आगमशासनस्यानित्यत्वान्नुमभाव इति डेम्बिडः॥ वा॥ डातं द्विषन्॥ वाहे षष्ठि
पत्वाच्चस्य मीति योगविभागात् स्य मासः॥ के जले आसरति॥सृ गतौ॥अच्च॥ यद्वा कटलइति स्थूलकाच्यत्वा
त्॥इषवर्थे चैतिका देशः सौ मे स्मे बाडं इति सीरिणां कषैरिणा भिडवराकं ध्वादि॥ धज्ञो घरय यङ सीरा
र्के डलयोरेकत्वं सिसारस्य स्तुयं स्मडवडत्रवाहनत्वात्तदूर्ववित्पंच॥६॥ ॥

शिवः ॥ शिवा कृ देवतास्त्यस्याः ॥ अ ॥ आद्यच् ॥ शंस्कु नादेदक त्वात् ॥ शिवकिअशिवा क्रोष्टा भवेदामलकी शिवेति शाश्वतः ॥ शृगालेपि स्त्रीलिंगः ॥ चतुष्पदां हि लिंगतावस्ये तेदतदप वादो यं भूरयो मास ॥ भूरि माय स्यामां विकृतां वाचं मिनोति मिञ्‌ प्रक्षेपणे ॥ कृ वा पे स्तु णम् रोम् धू र्त इव सं ज्ञायां कन् ॥ सृज ति मायां सृज विसर्गे बाऊ न कोत कलन नृत्यं कारि अ मृगा लाति वाकः पृषोदरादिः शृंगं न लाति पूर्ववत् ॥ शृंगालो वंचके दैत्ये शृगाले ॥ ड मेरे विदुरिति विश्वः ॥ तालव्यादि पिदं त्या श्च शं व ज मूकराभ स ता पिच जिह्वायां शृगालः कलगोपिचे तिश भेदात् ॥ वंचयते ॥ वंचु प्रलंभने रावुल्

॥ स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः ॥ शृगालवंचकक्रोष्टुफेरुफेरवजंबुकाः ॥ ५ ॥

वंचयति ॥ तिमकुटो कि स्थितां ता ॥ आकुस्त्री यस्य ॥ वंचे रात्मने पदित्वात् ॥ वंचकस्तु खले धूर्ते गृहबभ्रौ जंबुके ॥ त्रि ॥ क्रोशति ॥ क्रुश आह्वाने मित तनी ति तुनुन्त्वत् ॥ क्रोष्टुः फे इत्यव्यक्तं रौति ॥ मितद्रु रि बा तु फे इत्य क्रो रवोस्या ॥ गुहरु रुपं कृष भेकः ॥ फेरवस्त्वा मवः ॥ शिवा ॥ स्त्र करोति ॥ फजे फर‍ः स्वमा कृमडिलादित इतिसा दर्शकः ॥ जमति ॥ जमु अदने ॥ मृगय्वादि मित तद्भुर्दिलाड ॥ चू छके तिम कुटस्थितः ॥ दिलो पनसंगात् को ऽप्रसं ॥ गात्र्छ नृदि स्यात् ॥ जवक श्वरकरोष्टु क पिज बक वायमाजन्तरो मम डतिवाचस्पति ॥ दस्र ॥ ५ ॥ ॥

अवति निष्ठ आरकुभ्योगय्दं वा ॥ अकर त्वरणा रो ॥ स्नि तनी ॥ ति कुन ॥ ज्वरेतल रोदो घंगुणाः वेडमति विअनेवा ॥ विडआको
रो तमि विथि किडोति कालन ॥ किडालो नेत्र पीडेस्याछन्न दंश्राके के पुमान् माष्टिमुखं मुन्न नु खंडैरकं ति मजि भ्यां विरित्सा रव
मजे पृष्ठि ॥ माजरि ओ तो खदूं रो ॥ पृभमान मुपकान हरगति ॥ कंरानेक ८ मरिपु ॥ ॥ स्वाथें कन्न आ स्वून ठंकेआ
रकुभ्यो भुन क्लिवा ॥ भुजपालनाम्पव्य नकुरस्वः ॥ क्लिम्र । पंच गोधा याअपत्यं गोधा पाद्र कू ॥ आर द्रुमुदी वन्धत्र

तृन्नु किडम लोमाज्ञ रो पृषदंश्राक आरकुरनु कु ॥ त्रयो गोधार गोधेरगो
धेयागो धिका मजे ॥ ॥ स्वाविहु राल्प स्त्र होक्ति राजली रालनं रालं ॥

हि त्वात् टकु । त्रौ सि सर्पा ओधा यांजा तस्य चंदन गोविंदे तिरव्या तस्य ॥ ८ ॥ स्थानं विधय नि । भअताडने ॥ कि पत्न द्विप नो
तिदीर्घ राजतीरा नचलेने आघ्मा दित्वा घराल्पं नुन स्त्रि यां रांको जो बंडे षुतो मरमदन क्रुमे ॥ स्वा विधोनो छि
हि तिरश्चा तस्य ॥ स्वा विधेओ मति रालति ॥ वृषारि त्वात्कु न्वू ॥ गौरादि त्वात् जाति ला हुडीष ॥ स्त्री यां पचाद्यच
रालल लुनरां न्यो रि पालात्रालं नु रालको जो क्लि राली न्धगी गणविधौ ॥ त्री ॥ शिवातंस्त्र स्मि ॥ ते ॥ ॥ ॥

अ॰टि॰टी॰
ए॰९

वाताभिमुखधावनात् ॥ वातप्रमीः ॥ रित्युणादिसूत्रेण मांङः ईप्रत्ययः ॥ कित् ॥ वातप्रमी वातमृगः इति पुंस्कांडे अमरमालायां ॥ ति
तिवातप्रमीस्त्री ॥ रमृगः इति वोपालितात् स्त्रीत्वमूर्ध्वस्यात्कृदिकारादक्तिन इति वा ङीष् पिलेके ॥ अन्ये तु कारस्य दरास्य न पराधीनमाही
षितिङीषूनेत्याहुः वातइव वातस्य वा मृगः ॥ ८ मृगभेदस्य ॥ कोकते ॥ कुक आदाने ॥ अच् ॥ ईहामृगोषस्य ॥ ईहां मृगयते वा क
र्मण्यण् ॥ मृगयति तिमुकुटादिप्रिंत्य ॥ मृग अन्वेषणे ॥ इत्यस्मान्मते पुंसि लातः इह प्रधानो मृगो वा ॥ शाकपार्थिवा
दि ॥ ईहामृगस्तु पुंसी स्यात् कोकरूपकभेदयोः ॥ वर्कते ॥ वृक आदाने ॥ इगुपधेति कः ॥ मठादृगणोति दृञ् वरणे

वातप्रमी वातमृगः कोकः ईहामृगो वृकः ॥७॥ मृगे कुरंगवातायुहरिणाजिनयोनयः ॥

मृ दृ भू मृ इत्यादिभ्यः कक् ॥ त्रीणि विगड इति ख्यातस्य ॥ ७ ॥ मृग्यते व्याधैर्मृगः अन्वेषणे घञर्थे कः इति मुकुटः ॥ तन्न
परीगणनात् घञोपि रूपसिद्धेः अदंतत्वाच्चुरादौ प्रसंगात् ॥ मृगः पशौ कुरंगे च करिनक्षत्रभेदयोः ॥ अन्वेषणायां
याञ्चायां मृगी तु वनी तांतरे इति विश्वमेदिन्यौ ॥ कौ रंगति रगि गतौ ॥ अच् ॥ कोरंगो स्मस्य वा ॥ वातमयते अ
यगतौ ॥ बाहुलकात् उण् ॥ वातायुरित्येके ॥ वन भवमयते ॥ हरिरिति मनोहि यतेन ॥ तेन वा रूपास्मात् ॥ इन्विभ्य
इनच् ॥ हरिणः पुंसि सारंगे विशदे तद्वति त्रिषु ॥ हरिणी हरिता यां वातारी मित्र वृत्तभेदयोः सुवर्णप्रतिमायां ॥ ॥

राम
ए॰८

वज्रीति जिनस्यं योनिविश्वावी वाञ्जौ चतज्ञ इति रभसः ॥ पंचमक्षपाश्च मस्थि मांसादि ॥ तरापाविकारो वयवी वारर स्पाठञ्जरणस्यमञ्जा
स्यविरो काञ्च यवो वाञ्राणिरजतादिभ्यो घञ् ॥ जरमेरणीये ॥६॥ षंडे तेकुरिणभेदः ॥ अजिनयोनय स्फुः केदलति ॥ दल
विशरणे ॥ अच ऊ प ॥ कंजलंदल ति ॥ इति नुत ॥ आणख्रसंगात ॥ कंदेनं लो पञ्चे त्पर त इति मुकुटस्तु ष्ठिं त्पः उज्व
जदत्ता दिषु स्वचादर्शनात कं से स्यमूले ली यते ॥ नी कुमेलषणे ॥ अन्येभ्यो पी तिङः ॥ यद्वाकं दते ॥ कदि आह्वाने
इत्यादि त्वाच्छ्रच ॥ गोरादि ॥ रं भौ दन्ते चक दली पताका मृगभेद यो ॥ कदलध्वनो कं दली नुतु मृगगुल्मप्रभेद योरिति

हेरणोयमेरपु स्वर्मधिमेरणस्यै राममुभे त्रिषु ॥८॥ कदली कंदली चीनश्च मरुरुप्रियमकावपि मन्मरु श्चेतिदरिणा अ
मि अजिनयोनय ॥ रवी ॥

जांते पुंमेदिनी कदलत्री धी त्यमर माला कदलिडरिणांत रेरंभायां वैजयंत्यां चे तिदैमः अ...वंता
नेनाद्वि ति स्वामि चिं० त्य विनोति ॥ विञ्चयते बाकूलकाइ करीर्वश्च ची नीदेस्त्रां शुकश्री हि भेरेतां सोभ्यां तरेचमाचि च मुञ्जदन्तेकजा
दित्वा स्वरः इत्योदरा दित्वादतठ तू ॥ यद्वा चमू न्वां वाजस्य मिष्या श्रीणाते ॥ श्रियते ॥ श्रित्र तपसो ॥ इगुपधे ति कः स्वार्थे कन्रोभवानुरूप
स्यामश्री कुलेन्द्र स्वारः आबलल्ती ये तिसमासः कलसारः ॥ शिरापायांमृगभेदे स्तु छी तराविति दैमः ॥ तालव्यपावे कस्मात्स्वासौ सारश्चवरो

सारङ्गश्चलंव्यतयोरितितालव्यादौरभसः॥ रौति। रुरुशब्देजल्वादयश्चेतिसाधु॥ रुरुर्द्वेन्यंकुःगोपिचेतिहेमः॥ नितरामंचतिना
मंचेरितिकुन्यकादित्वात्कुंलंन्यकुःमृगमृगभेदेऽपिहेमचंद्रः॥ रमतेरज्यतेवा।रंकुः ह्याद्रिवादित्वात्साधु॥ रुंकुदरंकुरंकतिगच्छति
व्याख्यात तत्रारंकिधातोर्धातुपाठे स्त्र्यानात शंबरोगोति॥ कृत्रकररोगामीधातोसंज्ञामामित्यच्र शंबरो दानवांतरे॥
मत्स्येगागिरिभेदेषुशंवरीपुनरौषधावितिहेमः॥ रोहितंत्वरणाभेदमर्त्तिशोषेऽत्यराः॥ रोहितंचलरणा ... बुंपुंमिस्स
दुराशंतरे॥ गो।रिवकर्णीवस्यागोकर्णोश्वेतेरसर्पभृगभेदेगरणांतरे॥ अंगुष्ठतानामिकोन्मातेगोकर्णोमृविकोष

छ छ सारङ्गरुरुन्यंकुरंकुशंबररोहिषाः॥ गोकर्णपृषतेणर्श्यरोहिताश्चमरो मृगाः॥१०॥

धावितिहेमचंद्रः पृषाताः संत्यस्य अर्श आद्यच॥ यद्वा। वर्षति। पृषु ति वृषु सेचने॥ पृषिरं ... पृषांकि ... स्पतच्चमृगोवि
ह्ः पृषंश्चेव पृषतः श्व ... ति ... ति व्याडिः॥ एणतरलुमृगोविउरादितेविहृयतेः पिस्मादितिहेमचंद्रः॥ एतिवाकुल
कातलः ... च्छतिऽयत्ती वाबाकुलकातुस्पक॥ मृ ... न्यां ... पिष्ठ ... ति॥ ऋषिगातो अग्न्यादित्वात्साधु रिष्यो पिरिष्य
ते॥ रिषहिंसायां॥ अंध्यादिगराः कुरंगमोरिष्यसादृस्यश्वारुलोचनद्धमित्रिकांडशेषः॥ रोडतिरुहजन्मनिप्राड
र्भावे॥ वारुहेरस्यलोवेतीस्च॥ चमतिचम्यतेवा॥ चमुअदनेअतिकमि न्नमिचमिमीत्यमरः॥ चचमरंचामरे

गंधयति गंधर्वः तेन वा ॥ गंध अर्दने चुरादिः अच् ॥ गवा ॥ अर्व गतौ ॥ अच् ॥ गां धरति वा ॥ गंधर्वश्च शर्कं धावति वा ॥ गंधर्वो बोधो स्याद् गंधर्वः पशुभेदे
स्यात् तुरंगे कोकिले तथा । अंतराभवसत्त्वे च गायने खेचरे पि चेति विश्वमेदिन्यौ ॥ शृणाति ॥ शृ हिंसायां कृशृ शलि गादि भ्यो ऽभच् ॥
अष्टापदे चक्रे शरभः स्यात् मृगांतर इति ताजव्याडीर भस ॥ रमस्तु पशुभेदे मि हि कुरमे [illegible] तौ ॥ रमः ॥ रमंते ऽस्मिन् त्यानेन ॥ बाहुल
श्चेति घञ् ॥ रामो योधा हिंस्र [illegible] कीबंधा स्तु कुड्मलौ ॥ ताराचंद्रेतु वरुणे केमेदना मुधौ पिच ॥ द्वयेव पशुभेदे चत्रिषु चारौ
सिते ऽसिते ॥ सरणशीलः ॥ सृगतौ ॥ सृ यस्य द कसर च गवते गुड्न्याहे ॥ बाहुलकादयः ॥ यद्वा गवतं ॥ गुवेर प ॥ गवं नं वा याति ॥ गम

गंधर्वः शरभो रामः सृमरो गवयः शशः ॥ इत्यादयो मृगेंद्राद्या गवाद्याः पशुजातयः ॥ ११ ॥

लविक्षेत्मुजादिकः ॥ शशति ॥ शश प्लुत गतौ अच् ॥ इत्यादयो ये ऽशोक्ताः ॥ ये च पूर्वोक्ताः ॥ सिंहव्याघ्र [illegible] गोमेदाद
स्य स्वाद्यः ॥ सर्वे ते पशुजातयः ॥ पशुशब्दे वाच्याः ॥ पशुपति ॥ सर्वमविशेषेण ॥ दशिरप्रेक्षणे ॥ अजिदृशी त्वः ॥ पशिरादेशश्च
॥ पशु कृमुकुटः ॥ पशो ः सौत्रधातोः पश्वादय इति कुरितिस्तु स्फतिरित्याह ॥ कृके सत्रासमरस्फ जकं ॥ पशुपंते पालको रीति
स्वाम्यप्येवं ॥ ११ ॥ अंनत्ति तदि के ह्वे ॥ बाहुलकाहरः ॥ कंडरा कंडरइति शाशार्णवः ॥ मुसलाति ॥ मुसखेमे । मुसा
तैते दीर्घश्चेति किकन् ॥ मूषकस्त्रे मेदीघो पिधो स्ति मूष [illegible] त्व ॥ भद्र मूषिक आस्मंदी कुंदु रुकुं दुरु कुंदरं ॥ ॥ ॥

अ॰द्वि॰सी॰ मूषकोवल्लस्यानकमकांडेरो विलेशय इतिवाचस्पतिः ॥ आखनतिखनतु अवदारणे ॥ आंदुःपरयोःखनतिसृज्भ्यांडिचेत्युमुकुदक्तु
१०० आडि खनतिवद्योर्नलोपश्चेतिकुर्नलोपश्च बाहुलकादलोप इति सूत्रमुपन्यास्थत ॥ तेच्चिंत्यं उज्ज्वलदत्तादि विरोधात् ॥ गिरयां
मूषकस्यां गिरति ॥ कृन्दत्स्कुरितिरः ॥ किच्चाल्लस्तद्रूपसंज्ञायांकन् ॥ ह्रस्वत्वात् बालाचासौ मूषिकाच ॥ खवरिखु बलिमूषिकेति
हर्गः ६ ॥ स्मरतिस्मरगतौ ॥ शाकादिभ्योऽटन् ॥ कृदकंशिरोग्नीवा ॥ कंवं चलानि मयति ॥ शिल्पयोगेष्टुच्छुराति ॥ कर्मण्यण् ॥ हिगिर्मि

उंदुरुर्मूषिकोप्याखुर्गिरिकाबालमूषिका ॥ छुछुंदरीदीर्घदंती दीर्घजंतुर्जाहदि वांधका ॥१२॥
सरटःकृकलासः स्यात्प्रतिसूर्यः शयानकः ॥ जाहकोगात्रसंकोची मुसली गृहगोधिका ॥१३॥

टेतिख्याता स्य ॥ मुसतिमं शायं ॥ मुस खंडने ॥ वृषादित्वात्कलच् ॥ गौरादित्वात्ङीष् ॥ जातौ ङीषितिमुकुटः ॥ तन्न स्त्री
विषयः स्यात् ॥ मुसलस्यात् योभेचपुंनपुंसकयोस्त्रियां ॥ तालमूल्याखुपर्णी ॥ गृहगोधिका मोर पि ॥ तालध्वसमध्ये राम
तिस्वामि ॥ अल्पागोधा अल्पे इतिकन् ॥ गृहगोधिकाज्येष्ठास्त्री कुड्यमत्स्याच गृहगोधा गृहोलिकेति साहसांकः ॥ १००
॥ गृहगोलिकेति पाठः सम्यगिति स्वामी ॥ हे विष्टुतिपाठ इतिख्याता स्य ॥१३॥ स्पष्टोर्थः ॥१३॥ ॥

लूनाति॥लूञ्छेदने॥ हृसिभृग्रिणि॥ तितन संज्ञापूर्वकत्वाद्गुणाभावः॥ वृ॥ ऊर्णनाभो मर्कटकस्य नाम तत्संज्ञा चन्द्रहासः॥ ऊर्णा नाभौ यस्य सः॥ ओडवं कुक्कुरः श्रोत्रम्‌ करभकः॥ लूतालूनाति तन्तून्॥ तन्तुवाय इत्यपि॥ लूतिका नामेयमिति हैमचन्द्रः॥ तन्तुसन्ताने॥ भूयो मस्ति॥ तन्त्रातन्तून्वयतीति स्वामी॥ कर्णवि
तंतुन् नाभावस्य उर्णा इति योगविभागाद् बहुलं गोरीति कृष्णकः मर्कट इति केमर्क सौत्रो धातुः गत्यर्थः शाकादित्वाद् दहनसंज्ञा वा
कवन्॥ मर्कटकः स्वस्य भेदे स च वानरो लो तयोरिति विश्वः॥ चत्वारि मर्कटीति ख्याताः॥ नितरां गं जंगन्ति॥ जंगिगतौ नील
तिवाली लवणं लौ स्वच्छं किति साधु॥ नीलंगुरपि नीलांगुरीति हिरूपकोशः॥ नीलंगुः क्रमि जातिः भ्रमरश्यामप्रसूते

ऊर्णुनाभो लूता तन्तुवाया ऊर्णनाभमर्कटकाः समाः॥ नीलंगुस्तु कृमिः कर्णजलौकाः शतपद्युभे॥ २४॥

क्रमिर्दैमः॥ क्रमति॥ क्रमुपादविक्षेपे॥ क्रमितमिक्रमिस्तं भामतङ्दिति किः॥ बाहुलकाद्‌ संप्रसारणम पि क्रिमामयोम
वेत॥ पुंसि कीटे च कृमि वत्॥ कृमिरिति रभसः॥ कृमिता कृमिवल्की टलालायां कृमिलेश्वरो॥ हे कर्णस्य॥ जलौकेवा
सां तावत्‌ शतंपादा अस्याः कुंभपदीपूर्वेति साधुः॥ सांत लौ भपि स्त्री लवबोधनायत्र भेद इति हैमोजंग इति ख्यातस्य॥ २४ ॥

अ·टि·टी·
१०२

वृश्चति। ओव्रश्चू छेदने॥ वृश्चिकण् प्योकिकन्॥ भ्रादि ज्येतिसंप्रसारं॥ वृश्चिकस्तु द्रुणे राशौ शूककीटेऽप्यभिदो शूककस्तु ककी
टः शूकपार्थिवादिष्वग्रादि मन्वक कृमिविशेषस्य अलति। दंशेमद्यो भवति॥ अम् लगतौ। सर्वधातुभ्य इन्॥ भ्रंगादृश्चि
कयोरलिरिति रभसः॥ वाकुलकादि रार प्रत्ययदीर्घारिपि वृश्चिके द्रुणा आलिस्यादिति वोपालितः नांतोप्यस्ति अजमर्थो
स्याल्लिक्री द्यादि॥ लाति। अव्ययानामापृइति टिलोपः अथालीस्याद्वृश्चिके भ्रमरे पुमान्॥ द्रुणति॥ द्रुणादिं सागरेति
कौटिल्ये॥ द्रुणु पर्धेतिकः॥ अविद्रोणाइति स्वामी॥ द्रुणं चापे स्त्रिति द्रुणः॥ स्त्रीलिवीष्ठीतिरव्यातस्य॥ पारंजो वमवातिपराछ

वृश्चिकः शूककीटः स्यादलिद्रुणौ तु वृश्चिके पारावतः कलरवः कपोतोऽथ शशादनः॥२४॥

त्रोरंकारयद्यज्ञानोपदेशेन॥ अकरद्दाण्मदेशात्प्रत्ययः षष्ठीतीये पंचमी तियोगविभागात्समासः॥ परावतो दत्ता यस्याथं गुरुः तस्य
दमित्यणपारादयापततिप्रेम्णा॥ पत्त्रगतौ। पारावतस्थेछुघ्नकपोतरक्तलोचनपारापतकलरवः पत्त्री विपनः शशादन
नइतिरभसः कलोरवोस्य॥ कस्यवायोपोतइवकोवायूपोतानौरिवास्यवापारावतः कलरवः पत्त्री विपनः शशादन
तिरभसः कलोरवोस्य॥ कस्यवायोपोतइव कपोतस्याल्कपोतो विहंगांतरेइति ॥ स्त्रीलिपारेवाइतिरव्यातस्य॥ शशमत्तिअदभ

१०१

अतिशयितं शरस्तंवा पत्रमस्य अत इति श्येनाख्यो॥ विहंगपत्री रोगो शरपत्रिरणा विति शशाम्बत श्येनायुते॥ श्येपेङ् गतौ॥ श्यायास्याङ्ग वश्य इन च॥ स्त्री शिवाज इति ख्यातस्य॥ तचति॥ तच समवाये॥ तन्तुकादयइ तिसाधुत्वं स्तुकपुंसि कोकरा विकीर्ष भारतयो धिनिवायस्य काकस्यराति॥ पचतिसमपति पच्यते वा उलूखेन तु पच्च पपाके पचिम च्योरिचो पच्‍धायाइ तिपुमान्॥ अतइत्वं घूरयंतेतिपुराः पारावतौ प्यशाकाख्यौ दिवांधो वक्रनासिकः॥ हरिनेत्रो दिवाभितीन्रखावगापीलर्घर्घरी

पत्री श्येनः उलूके तु वायसारातिपेचकौ॥ दिवांधः कौशिको घूको दिवा
भीतो निशाटनः॥ व्याघ्राट स्याद्भरद्वाजः खंजरीटस्तु खंजनः॥१६॥

काकभीरुर्नक्तचारी तिन्नीकांडशेषः त्रीणि॥ घूकस्य॥ व्याघ्रं अटति॥ अटगतौ कमरयपरप व्याघ्रइवाटति वा भ च भरद्धारकोवाजोस्य॥ यद्वा॥ भरद्वाजस्यापत्यं॥ ऋषभ्यणसंज्ञा पूर्वकत्वात्वाद्धभावः॥ भरद्वाजो गुरोपुत्र याव्याघ्राटस्याविङंगमेदे भरद्वाज इति ख्यातस्य॥ खंज इव रटति॥ रुगतौ वाकु लकाव कीटनरखंजति॥ खजि गतौ वैकल्ये॥ नंद्यादित्वात् ल्युः खंजनः खंजरीटे स्त्री तवमिरखंजनं गतो॥ हेखंडि रिति ख्यातस्य॥१६॥ ॥

अ॰टी॰ १०२ लोहमिव पृष्ठं यस्य। कं कते। क किरा व ते॥ अच्॥ कंकः १ ल्ल सहिलोः ख्यातो लोहपृष्ठ कतां त यो ह्व कंक त्वुडेतिख्या
ख्यात॥ चाषयति। चषहिंसायां स्वार्थेरपं तः चष नच्चरोगे॥ हेलमन्य न्येति वा॥ अच्॥ चासो पिढ हृष्यक्षिसिरोग्या
सहतिदं त्यां ते ल्लुरभसः॥ किकिड् इति दीव्यति वाशते॥ दिवु क्रीडाया दीव्यति विरुद्ध लिति माध्व॥ किकिदिविस्त्वाचाप॥
स्याद्द्ध द्या स्वे कामगं ल्लजाइतिरत्नकोश॥ चाषो दिविकि कः॥ स्त्र तइति व्याडि॥ ह्वि चास इति ख्या तस्य॥ केम

॥ लोहपृष्ठस्तु कंकः स्यादथ चाषः किकीदिविः। कलिंगभृंगधूम्याटा अथ स्याच्छतपत्रकः॥ १७

र्वि जिं गं हृल्लास्य॥ कलिकलहं गच्छति वा गमश्च्वे निर च॥ खजच्चाडिष्ठ रूष्वमः॥ पृतिकम्ब जेन्द्र स्याडे भ्रमन्तिनी
पृतिनष्ठ्यो॥ कुटजकल्लेम हिला यांतु मो षिति॥ भृंगइव कृष्ण त्वात॥ यह वि भा कै कुलं॥ भृत्र॥ किन्तुह
ति गन॥ भृं गोधूम्याट पटु योः मधु व्रजे भ्यारा जे पुंसि भृंगंल्लुरुत्वचिं॥ धूम्याधूमममनृ डडवाट ति अच॥ त्री
शिव्रातप त्रारण पस्य॥ १७॥ ॥ राम १०२

दाऽऽकं आदं इति ॥ हारगवादनोऽरां तस्य चटः ॥ मकु नामार तति धिकाष्टकुटः खातलुद इति त्रिकांडशेषः ॥ हिक्काव कोश
इति ख्यातस्य सारमति शार्य तेवाऽन्याद्दिनाष्टदिं सांयांसंपतः ॥ तरत्याह भक्षेत्यंगच ॥ सारेरंगाजिति मुकुटः तन्न
ज्यलद तादित्त्विधे तस्सूत्रादर्शनात सारगश्रुतकेख्यातश्चबद्ध ॥ हरिणोपि चेति तालव्यादौरभसः स्मरति ॥ रुद्रवृजोहि
छिन्ने तं गच ॥ स्तगतौ गिच हूर्व विदरागदृछि श्चेति मुकुटाश्विं तत्र अरणोऽप्रसंगात्तस्तु दलो शिति सिद्धत्वात रणिञ्च

दा वाघाटेथ सारंग ॥ स्तोककश्चातकः समाः ॥ रुक वाकुला [illegible] टश्चरगाणुधः ॥ १९ ॥

ध्र मोजना भावाच्च ॥ चातके हरिणे पुंसि सारंग शबले त्रिषु इति दंत्यादौ रभसात ॥ महस्सारमंगं मस्या शाकं आदिः
सारंगः पुंसि हरिणे चातके च मतंगजे ॥ शबले त्रिषु स्तोकं कं जलमस्य स्तोकंकाम तिचाके शहे आतोनुपेति कः न
तति ॥ चतयाचते ॥ राबलम ॥ त्रीणि पीयिष्ट इति ख्यातस्य कुके नगलेनवृक्कि ॥ वचमाणय ॥ कुके वचः कश्चेत्पुरण ॥ क
कुकचा कुर्म हरेपि सरटे च रगा युधेइति विश्वः ॥ ताम्रा चूडास्या कोक नं कुक आरटने स्थि पदादि [illegible] टति ॥ ॥

अ॰द्वि॰ कु कौटिल्ये॥ इगुपधेति कः॥ कुका॥ कुटः कर्तृ करणेति समासः॥ कुत्सित कुटो॥ कोऽस्त्यस्य कुटो वा पृषोदरादित्वात्किं पक्षी
२३ कुटतीति इगुपधत्वात्क इति कुटः अपाणिनीयम् द कात् त्वं ... अकारान्तं रूपपदं शोपपदो वि ... धने तिवा नि कि ॥ कुकुट
टन्तत च यपि यां स्त्रीं स्पाचरणायुधो॥ निपाद स्त्र ... योपुत्रे ... गैका यां च कुक्कुभे इति विश्वमेदिन्यौ चरणे आयुधम्
मस्य चत्वारि॥२८॥ चरति। चटभेदने॥ क्वन्॥ अजादित्वादापू दिपकारत्वान्नेत्वं॥ कलविङ्क मानूग्रामचटके

चटकः कलविंकः स्यात्तस्य स्त्री चटका तयोः॥ पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि॥२९॥

पिकलिंगके॥ द्वौ चटकस्य स्त्रीति विवक्षायां पुंयोगादिति आमो ङीप् जातौ लक्षणं ङीषद जादि पाठाट्टाप् इति चट
का॥ चटकस्यवापत्यं पुमपत्यं चटकाया ऐरक्॥ चटकादपीति वक्तव्यं तयोश्चटकानकयोरिति मुकुटः॥ तन्न लक्षमा
न्तस्त्रियाङ्लं तरंगैकशेष प्रवृत्त्यां ... सं भवात॥ स्त्री चतदपत्यं चेति॥ तस्मिन् स्त्रियाम पत्ये नु ... राम
त्परको पिलुकू॥ लुक तद्धितलुकि पुनः टाप्॥ एकं॥२९॥ ॥ १०३

कं केति रटति ॥ रट भाषणे ॥ मृगय्वादिश्च यच्चाद्यस्क्षेतिमुकुटस्तु चिंत्यः ॥ अच् ॥ कृकेन कंठेन अणति वा अण रणे क्षिक्षे
च शकंध्वादिः कृकणः इति राक्षः करणाकरौ ॥ क्रुञो ऽहेतु ताच्छील्ये ति टः ॥ ५ ॥ वनप्रियमस्या परेण काकेन भृतः ॥ कोकते कुभी
आदाने ॥ सलिलनीतीरक् ॥ अजिराद्यस्क्षेति किरइति मुकुटः ॥ तन्न ॥ किर विगुणाभाव प्रसंगात् कोकतेरतिरध्वन
तभावात् ॥ उज्ज्वलदत्तादिष्वप्यस्य त्रस्यादर्शनाच ॥ अपि कायति आतश्चोपसर्गे कः ॥ बहिर्भाष्यरितिरित्यलोपः च
त्वारि ॥ २० ॥ कायति ॥ कै शब्दे ॥ दरण ॥ नी कायेति कन् ॥ काकः स्याद्वायसे द्रुमे भेदे पीवसर्पिणि ॥ त्रिरावष्टानेमा

॥ करटः करेटुः स्यात्कृकणक्रकरौ समौ ॥ वनप्रियः परभृतः कोकि
लः पिक इत्यपि ॥ २० ॥ काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ॥

न प्रभेदे द्वीपभेदस्मा ॥ काकस्यात्काकनासायां काकोलिकाकजंघयोः ॥ काकस्यात्काकनासायां काकोली काक
जंघयो रक्तिकानामलघाचकाकमाच्यां चयोश्चिति ॥ काकं सुरतबंधे स्यात्काकानामपि संहताविति विश्वमेदिन्यौ
॥ करोति शकुनं ॥ शाकादिभ्यो ऽटन् ॥ केरटति ॥ रट परिभाषणे ॥ आचूवा ॥ करटो ॥ जगडे स्यात्कुसुंभे नि द्यजीव
ने एकाल्स्याला दिस्त्रोढकुरुटे पिवासे मरिष्टमस्य अरिष्टोल्लसुने निंबफेनिले काककंकयोः ॥ बलिना पुष्टः सकृत्प्रजायास्य

अ॰टि॰टी॰ सकृत्प्रजा यस्य ॥ ध्वांक्षतीति घोरवाशितेच ॥ ध्वांक्ष॰ स॰ काकेवके र्थिनी ॥ ध्वांक्षिक कोलिकायां स्यात्का क इति शब्दनात ॥ आत्मानं
२०४ घोषयति ॥ घुषिरविशब्दने ॥ अन्यान्पर बिभर्ति ॥ डुभृञ् ॥ क्विप् ॥ बलिं भुंक्ते ॥ भुज पालनाद्यो ॥ क्विप् ॥ वयगतौ ॥ वयस्येतस्माद्बृ
शितत्वं वयतौ तिमुकुरस्थिलसु ॥ वयते रात्मने पदित्वात ॥ दन्त्या ॥२१॥ द्रुणाति ॥ द्रुण हिंसा गति कौटिल्येषु ॥ अच् ॥ द्रोण
ख्या ॥ द्रो णोमाघ काके स्याद॰ स्वछाम्लो गुरावपि रुद्र ॥ द्रोणो त्रियामार्त केस्याद्रास्त्र काति चतुष्टये ॥ द्रुमान्तक
लाकाके स्त्री नाउर्द्धं तरे स्त्रिया काष्टांबु वाहिन्यां गवादन्याम पीष्यते ॥ काकयति ॥ क कुलौल्ये ॥ स्वार्थे रूपं तथा क

ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥२१॥ द्रोणकाकस्तु काकोलो दात्यूहः कालकंटकः ॥

लकाकोलच ॥ काकोनरकांतरे ॥ काकुले द्रोणकाके च विषभेदेन च स्त्रियां ॥ द्रोण॰ काको दग्ध काकोवनाश्रय इतित्रि
कांडशेषः ॥ ढौकी च काके तिख्या तस्य ॥ दा प्॥ लवत ॥ क्विन ॥ दातिमार्गत्वच्छेदे ॥ कडवितर्के ॥ अरण्य यहृदिस्पो राम
द्रेऽपंतस्पदमित्यमरः ॥ दे विकाशिशयेत्यात्ये वाह ॥ कुठिरा के ध्वा दिदात्यूह ॥ कालकंवः के चातकेऽपीतिहैमः ॥ का २०४
ले वर्णा कालिक वो ध्वनिरस्य ॥ कंठः स्वरेतिमके गलइतिरुद्रः ॥ काल कांठस्य क प्॥ कालकं गौपीत साहिमरस्व
रे दात्यूहे ग्रामचटके खंजरीटे वे शिखावटेष्वितिहेमः ॥ चं द्रः दे ॥ ॥

आतायमते तस्त्रीत्व ॥ तायसंतानपालनयोः ॥ सुप्पजा ताविति शिति ॥ यद्यप्यत्रवृत्तिकारादितिरत्नु पमागेइ सुक्तं ॥ तथ्यापि भाष्येणपसर्गेपिशिति ॥ स्त्रीकृतस्वामीत्तु ॥ आतपति विग्रहान् ॥ आतापीति पार्वमन्यते ॥ चिलति विल्वश्चैथि ल्ये ॥ त्यवक्रतोचअन्य ॥ विलखगोमचलस्य पिलवत् किन्न त्विरागतइतिहेमः हे चिमि ... तस्य ॥ स्मृतेदस्त्रदृष्टैरसी प्रार्थेचगृधद्दिस्पृहि ... ॥ दत्ताप्पस्पायअराग ॥ गृध्यति ॥ गृधु अभिकांक्षायां ॥ सुधातृधिभ्यक्रनृत्यधः ॥

आतापिचिल्लौ स्लामायगृध्रौ कीरसुकौ समौ ॥२२॥

॥ खगांतरेपुं ... के ... र्थ तेइतिमुकुरस्थित्य ॥ गृधेदकत्वात् ॥ हिगीधइतिख्यातस्यात कीर्ति रयति ॥ अच ॥ इगुपधत्वादितिमुकुटः ॥ तत्रशिंजंतविग्रहदर्शनादिगुपधत्वाभावात्कीरः शुकं पुंस्नि नीवृतिरोगक ति ॥ सुकागतो ॥ इगुपधेतिकः ॥ यत्रस्शोभते ॥ शवतेवा ॥ शुभगतो ॥ शुगतौ ॥ वाशुकवक्केल्कादि तिसाधुः ॥ शुकोव्यासस्तुते कीरवरास्यचर्मंत्रिशीरीषपादपेपुंसिस्त्रे थिपरोगनिपुंसकसमाविति त्रिषुमोज्यं ॥२२

अ॰ टि॰ १०५ क्रुञ्चा ॥ ति ॥ कुञ्च कौटिल्याल्पीभावयोः कल्वि करद्धगिति साधु ॥ अल्पाघस्य ॥ क्रौञ्चो द्वौ पक्षिभेदे स्यात्तु पर्वते
भेदयोः स्त्री या मजादित्वाद्दाप् ॥ कंचइति पाठे पचाद्यच् ॥ हे करं कुलङ इति ख्यातस्य ॥ बकते ॥ बकि कौटिल्ये गतौ च अच
आगमः व्यस्त्रस्यानित्यत्वात्तुम् ॥ बवयोरैक्यं ॥ यद्वा ॥ वाति ॥ वाम तिवा ॥ वागत्यादौ ॥ औ वै शंजशोषण कन्ना ॥ ते ॥ ले ॥ भुवि
ति कायति वा मूलविभुजादिकः ॥ विक्विवा ॥ अ च ॥ न्यंकादि दि ॥ बकस्तु बकपुष्पे स्यात्कहे स्त्री देवरद्वाक्षिक इति शर्व के
जले वा कयति ॥ कस्यस्यद्वोयं स्यहुमः ॥ मूलविभुजादित्वात् ॥ दीर्घजंघेति ख्याति ॥ स्यात् कोटः स्युः कवायसः ॥ कंकेरु

क्रुङ् क्रौञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः ॥ कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥ २३ ॥

इति बलिस्तु ... तिस्रः कं ॥ इति पुंदेहमः ॥ हे ... पुष्कर सदृश ... ॥ कायस्या सरसि भवः ॥ तत्र भव इत्यण् ॥ सारसः
पक्षिभेदे स्यात् ... ॥ कोकते ॥ कुक आदाने ॥ अच् ॥ कोकश्चक्रे वृके ज्येष्ठ खर्जूरी क्रमुक ... ॥ क्रिय
ते घञर्थे कः ॥ केकला दिनांचेति ही लं ॥ ... की बक ... रथांग्यो ॥ राष्ट्रं भात ... पक राम १०५
रणं सयो ॥ जलावर्ते पि चक्र राष्ट्रे नो च्यते ॥ वचनापरो ॥ ... ॥ रथांगस्य चक्रस्याह्वयो नामयस्य ॥ चत्वारि चक्र
वाकस्येति ख्यातस्य ॥ २३ ॥ ॥

कदंबे समुदे भवति तत्र भवइत्यण् ॥ कादंबस्यात्पुमान्पक्षिविशेषे सायके पिच ॥ कलो मधुरध्वाक कलहंसः मंजुलकादंबेरा
जहंसेनृपुंगवे ॥ छत्वतकइतिख्यातस्य ॥ उत्क्रोशत्युत्क्रोशति ॥ क्रुशआह्वाने ॥ अच् ॥ कवते ॥ कुङ् शब्दे कुच कुरत्व कुर
ति ॥ कुरशब्दे ॥ कुरछेदने बाकुलकादरगिरितिस्वामिमुकुटौ ॥ कुवःकुरतितिस्त्रत्रास्मरेरणमूलकौड्रेयो ॥ हंतिग
च्छति ॥ पृऊबहिदिहनीतिसः ॥ सह ॥ अविभेवेहूयगिमा हंसइतिसक् ॥ हंसःस्यात्मानसौकसितिर्लोभिदृविर्तकीप

कादंबकलहंसःस्यादुत्क्रोशःकुररौसमौ ॥ हंसास्तुश्वेतगरुतश्चक्रां
गामानसौकसः ॥ २४ ॥ राजहंसास्तुतेचंचुचरणैर्लोहितैःसिताः ॥

रमात्मुनिमत्सरौ ॥ योगभेदेमंत्रभेदेशारीरमरुदंतरे ॥ तुरंगमप्रभेदेवश्वेतागरुतोस्याचक्रांगं ॥ अन्यस्य च्क्रांगा
मानसौकसा ॥ चक्रांगी कटुरोहिण्यां मानसंसरओकोस्यच त्वारि ॥ २४ ॥ चंचुसहिते चरणौ राकपार्थिवादिः ॥ यहा
॥ चंचूमिश्च चरणौ श्चेतिहस्य सारिनूर्यस्यकत्वंतुनभवतिकुत्वनास्तिकेतिदीर्घस्तु तइति चनिर्दिष्टत्वान्तस्या
नित्यत्वज्ञापनात् ॥ तैलोहितेरुपलक्षिताः ॥ हंसानासौराजहंसादिः ॥ राजहंसस्तुकादंबकलहंसेनृपोत्तमे ॥ ॥

अ.टी.
१०६

किंचिद्धूम्रवर्णैश्चञ्चुचरणैरुपलक्षिता ॥ मल्लिका इति आख्या येषां ते मल तेमलधाररोसबधानुभ्यइनस्वार्थे कः ॥ अच इ
ति मुकुटः ॥ तन्न ॥ मल्लेलति त्वात् ॥ मल्लिकोहंसभेदे स्यात् तत्र ॥ श्रूल्लेपि मल्लिकेरुद्रः ॥ मल्लिलिको हंसभिद्यपि ॥ मल्लि
कात्तरा ॥ श्रू ल्लेपि मीनमत्स्यान्नभेदयो ॥ मल्लिकाकारमल्लारमन्ति यस्य स्तुलकायां ॥ लादितिस्वामी बकुली देस क्यारोगो
रिति प्रच ॥ रक्कं ॥ हंसभेदस्य कलस्यचञ्चुचरणैरुपलक्षिता ॥ धृतराष्ट्रभवा ॥ तत्र भवइत्यण् ॥ धृतराष्ट्रसुराजिस्यात
पक्षिहस्त्रियभेदयोरितिरभसः ॥ रक्कं ॥ २५ ॥ शारीरम्छति ॥ शारदिसायां ॥ कगतौ ॥ अचइ ॥ गुंडेधौ नौ शरंनीरइति

मल्लिनेत्रा मल्लिकाख्यास्ते धार्तराष्ट्राः सितेतरैः ॥ २५ ॥ शरारिराटिराडिश्च बलाका बिसकंठिका ॥

तालव्यादेरभसः ॥ शरारिरितिमध्यांतरं ॥ शरं भजति ॥ अतसातत्यगमने ॥ अज्यति भ्यां चे तिइण् ॥ आअटति इ
तिइन् ॥ आअडति ॥ अडउद्यमने ॥ इन् ॥ कपिलिकादित्वाल्लत्वे ॥ शारीलिरपि ॥ अत्तडिभ्यां ॥ इ ॥ शरीतिमुकुटः ॥ तन्न ॥ राम
॥ उज्वलदत्तादावेतस्य त्रातुर्नात् त्रयोपिस्त्री लिंगाः ॥ आडिः ॥ शरारिर्वन्नरटी गंधोलीवानरीकपीतिस्त्रीलि १०६
गकांडेरत्नकोशात् ॥ त्रीरिआडीतिख्याताया ॥ बलते ॥ बलसंवरे ॥ बलाकादयश्चेतिसाधुः ॥ बलेनाकति
वा ॥ अ ॥ बिसवत्कंठोस्याः ॥ बकभेदस्य ॥ दुर्गीतेसेवतेसर ॥ बहुसंभक्तौ ॥ ॥

हरणी ते सेवंते मर ॥ खट्व-संभक्तौ शाकादिभ्यो ठन् ॥ वरटा ॥ हंयोषयांस्त्री हंस्यां ॥ तु ॥ तन्वरतौ पुमान् ॥ एकं ॥ लक्ष्मी रस्त्यस्याः ॥ ल
क्ष्मणा ॥ अन्नदेवेति न ॥ सारस्यां लक्ष्मणा नानु सोमिश्रौ श्रीमतित्रिलिंगे ति रुद्र ॥ निर्मकारो पि लक्ष्मणश्चैव सारसे इत्यमरमाला ॥ २ ॥ ल
क्षणं नाम्नि चौ क्रौंचसारस्यां लक्ष्मणा क्वचित् ॥ लक्ष्मणा त्वोषधी भेदे सारस्यामपि योषिति ॥ रामभ्रातरि पुंसि स्यात् के चापि चिह्नि
द्यवदिति विश्व ॥ एकं ॥ २ ॥ जत्विव ॥ इवे प्रतिकृताविति कन् ॥ रामके जतुकं चर्मपत्रा जतुकृतौः स्त्रियामिति चवर्गतृतीया
दौ रभसः ॥ अजिनमिव पत्रमस्याः ॥ छिचामचिरपीतिरव्याताया ॥ परं श्रा-उष्ठ्णं यस्याः ॥ गौरादि ॥ जातेरिति ङीष् ॥ तिमुक्तु

हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा ॥ २८ ॥ जतुकाजिनपत्रा स्यात् परोष्णी तैलपायिका ॥

ट ॥ तन्मक्षौ चीविशष्मातिरिक्तमिति स्वयमेव व्याख्यातत्वेनास्त्रि विषयादिति ङीषधात ॥ तैलं पिबति ॥ पापाने ॥ एकं ॥
तनुकमिस्त्विं द्रगोमः कं ॥ परोक्षां तैलपायिका ॥ तैलाभ्यकारवला धाराणि व्यजीकास्त्रियामितिरभसः ॥ वेनुरकवि ष्ठावागु
लिकादिनामिकायां ॥ वरीति ॥ वरति ॥ वरणा ४ हे ॥ अचः ॥ यह ॥ वर्द्धति ॥ वर्वगतौ ॥ पचाच ॥ मशति ॥ मशाश्रु
॥ इति मशिभ्यांस्तिकन् ॥ मच्छितिवा ॥ मक्षरोषे संवाने च ॥ कन् ॥ एकं ॥ नीजति ॥ ॥

अ॰टि॰टी॰
१०७

णी जवर्णे अच् ॥ नीलेति ॥ किं या शाम्योयं विवक्षितो न तु गुणमात्र इति नलोपः ॥ गुणविवक्षायां नीलीति ॥ नवलेव ॥ निलवर्णी
मक्षिका यात्रकं ॥ केचित्तु नामत्रयमिदमाहुः ॥ तदस्तु ॥ ॥ यां इति मुक्त एव ङीप् भावः ॥ सरं गतिमंतं घातयति ॥ अ
न्येभ्योपी तिड: ॥ णिलोपे टिलोपे ॥ रघ रण रघि गतौ ॥ खनो घ च इति घ ॥ दन्येभ्योपी ति घः ॥ आगमशास्त्रस्यानित्यत्वा
न्नलुम् ॥ महस्घेण गत्या वर्त्तते ॥ २७ ॥ पततीति पतेरंग च पक्षिणी त्यंगच् स्वार्थे कन् संज्ञायां वा ॥ कुत्सितं तायतेता

वर्णी गणमक्षिका नीला सरघा मधुमक्षिका ॥ २७ ॥ पतंगिका पुत्तिका स्यादंशस्तु
वनमक्षिका दंशी तज्जातिरल्पा स्याद्गंधोली वरटा द्वयोः ॥ २८ ॥

यू संतानपालनयोः ॥ ... कः ॥ पात्मलोपः ॥ केण इति ह्रस्वः ॥ ६ ॥ मधुमक्षिका ॥ ... दंशतीति ॥ दंशादशतिमच
दंशः कीटविशेषे च वर्म दंशनयोः पुमान् ॥ वनस्य मक्षिका ६ ॥ अल्पा दंशस्य जातिः ॥ ... विवक्षायां गौरादित्वात् राम
ङीष् ॥ एकं गंध ... गंध अर्दने ॥ ... ॥ गौरादिः वृणोति ॥ ... वररो ॥ ... पोऽरन् ... विवर १०७
द्यपि ॥ वरटा वरटी हंसी ॥ ... पती वरटः स्मृतः इति तारपालः ॥ ६ ॥ करडे इति ख्याता याः ॥ २८ ॥

भृंगं रूपमाराति ॥ [illegible]रणने ॥ भृजविभृजादिकः ॥ गौरादिः ॥ यद्दाबि भर्त्ती ॥ भृंगार भृंगारावितिसाधुः ॥ यद्दाल्पेरण भृंगामुच्छति
॥ ऋगतौ ॥ अस्य भृंगारी झिल्लिकायां चक्रनकाल्लौ उनः ऊमानू ॥ चीरिरीति ॥ रुरुशब्दे ॥ बाह्यलकात्ककुड्डीरुकेतिमुकुं
दः ॥ चिनोति ॥ चिञ्चयने ॥ स्फायितंचिभा नां दीर्घश्चेति क्रमन ॥ चीरीझिल्ल्यां नपुंसकं ॥ गोरत्नेनव स्त्रीभेदे चरेखातलद भेदयोः चि
छ्वति चिछ्वरीयं चिल्वे अच् ॥ पृषोदरादित्वाचस्य गः ॥ गौरादिः स्वार्थे कन् ॥ झिल्ली चीयातिपरु चाविल्लमिति द्वंद्वे तन्नांत्यकेइ
ति विश्वः ॥ चत्वारि डिंडी गुरेति ख्याता या ॥ पतति पतेरंगच् ॥ पतङ्गी (ग) त्यंगच् ॥ पतंगः राजतेश्मालिप्रभेदे पक्षिसूर्य

भृंगारी चीरुका चीरीझिल्लिका च समा इमाः ॥ समौ पतंग शलभौ खद्योतो ज्योतिरिंगणः ॥ २९ ॥ म
धुव्रतो मधुकरो मधुलिण्मधुपालिनः ॥

मैः ॥ शलीबंस्दते इति विश्वमेदिन्यौ ॥ शलति शलचलने ॥
म्टश्यलिकलिगादिभ्योऽभच् ॥ हिफणिगेतिख्यातस्य ॥ खे द्योतते ॥ द्युत दीप्तौ ॥ अच् ॥ खं द्योतयति वा अस्य ज्योतिर्न क्षत्रं
तद्रिंगति ॥ इतिगतौ ॥ नवनवस्यार्थादिति स्युच् दे ॥ ३९ ॥ मधुव्रतं भक्तं यस्य ॥ मधु करोति ॥ तच्छील्ये इति टः ॥
मधु लेढि लिह आस्वादने ॥ क्विप् ॥ रावंपुष्पलिट् ॥ मधु पिबति पा पाने ॥ आतोनुपेति कः ॥ पिबतेः सुरासीध्वोरिति निपमात्रटक् ॥

अ॰ टी॰ अलोहस्विकलोंगुलंतद्विवास्य स्य अतद्वतिः ॥ द्वौ रेफौ नाम्नि यस्य विभक्तिः ॥ भृज्जः किलुह्वचेति गन् ॥ षट्गांगाभं
१०८ गाइति मुकुटस्थित्य ॥ करगादिष्टुः ।८ रास्त्रत्वाभावात् ॥ षट्पदान्यस्य भ्रमति ॥ भ्रमु अनवस्थाने ॥ अर्तिकमिभ्रमि
चमीति करन् ॥ भ्रमरः कामुके भृंगेऽपि ग अलति ॥ अज भुषणादौ ॥ सर्वधातुभ्य इन् ॥ अलिः स्तुरागुरुस्तु लिंगो स्वरा ॥३०
मयैते ॥ मयगतौ ॥ खजादित्वाद्रः ॥ मद्यां रौतीति वा ॥ अन्येष्वपीति डः पृषोदरादिः ॥ बर्हमस्त्यस्या फलवर्हिभ्यामिनन्

द्विरेफपुष्पलिट्भृंगषट्पदभ्रमरालयः ॥१०३०॥ मयूरो बर्हिणो बर्हीनी
लकंठो भुजंगभुक् ॥ शिखावलः शिखी केकी मेघनादानुलास्यपि ॥३१॥

इति बर्हि ॥ नीलः कंठोऽस्य ॥ भुजंगं भुंक्ते ॥ भुज पालनादौ ॥ क्विप् ॥ शिखास्य दंत शिखासंज्ञायामिति बलच् ॥ पक्षे व्रीह्यादि राम
त्वादिनिः ॥ शिखी च ॥ कोकिलो बर्दे शिरे केतु ग्रहे ऋजुमे ॥ मयूरे कुक्कुटे पुंसि शिखावत्युन्पालिंगकः ॥ केकास्त्यस्य व्री १०८
ह्यादित्वादिनिः ॥ मेघनादेनानुलस्यति तच्छीलः ॥ लस श्लेषणक्रीडनयोः ॥ सुप्यजातौ विति शीनिः ॥ नवमयूरस्य ॥३१

केम्हद्धिकायते॥कैशद्वे॥अत्येभ्योपि तिङः॥लजर्दं त्यादि त्यस्तु कः॥ राकं चंद्र इवे व प्रतिकृताविति कन्॥ मेचकौ
वर्णो ह्यस्य॥अच्॥ बर्हिकं वसमं वर्णां मेचकं कुर्वते बुधा इति कात्यः॥ मेचकः श्यामले कृष्णे तिमिरे बर्हि चंद्रके इ
तिहैम॥ द्वे पिच्छस्य चंद्रकनेत्र॥ यगते॥ रगोउ कुस्यस्ये॥ तिरवः॥ शि. रव. र.. रव. वर्हि चूडा लांगिजि क्य अग्रमात्रके॥ चूडा
मात्रे॥ शिकायांच॥ ज्वालायांग्रपदे पिच्॥ चुडजते॥ चुडसमुछ्छ्राये॥ भिदादिपाठाद्दीर्घ चूडा॥ चड भेशिरवा

केकावाणी मयूरस्य समौ चंद्रकमेचकौ॥ शिखा चूडा शिखंडस्तु पिच्छवर्हे नपुंसके॥३२॥

या वाङ्मयूरस्य॥द्वे॥ शि. खि. न. स्यते॥ अमगत्यादिषु॥ नमंताडः॥ सकंध्यादिः॥ शिखंडो बर्हचूडस्ये॥ सितिहैम
चंद्रः॥ पिछं तेवा॥ पिछकुदने॥ अ[illegible] वृन्दा पिछापूगछटाको षमो षा स्यात्मति चेष्टको॥ भक्तसंस्कृत मेडवं
प [illegible] वश्राँ पदामये॥ स्त्रि यांपुं सितुलांगूलेनतद्यो वर्हि चूडस्य मोः वर्हीति॥ [illegible] अच्॥ वर्ह पिछे दले स्त्रियां
स्त्रि रगी॥३२॥

अ॰ हि॰ टी॰
१०९

खे गच्छतीति ॥ अन्येष्वपीति डः ॥ खगः स्मृतः पुंसि देवे मार्गणे च विहंगमे ॥ विहायसि गच्छतीति ॥ विहायसो विहश्च ॥ गम्श्चेति खच् ॥ खच् च डित् ॥ हेतुविहगः ॥ तत्र लीगस्मादेशश्च गमे च विहंगमे ॥ विजहातीति अच् ॥ ओहाक् त्यागे ॥ विहितमास्त्यस्य दसौ तस्य तत्र ॥ णिच्युपधयु कु ॥ क्वचिच्छंदस्या अपि भाषायां प्रयुज्यंते ॥ तेन लोकेऽपि ॥ यद्वा विहायः पतिः इव यातीति वा स्वार्थेऽपि तः ॥ सर्वधातुभ्योऽसुन् ॥ विहायाः शकुनौ पुंसि गगने पुन्नपुंसकं ॥ शक्नोति ॥ शकेरुनोन्तौ ॥ शके ति

खगो विहंगविहगविहंगमविहायसः ॥ शकुंतिपक्षिशकुनिशकुंतशकुनद्विजाः ॥३३॥

तोन्तुन्तयः ॥ इति प्रत्ययचतुष्टयं ॥ शकुनिः खगेकरणभेदे कौरवमातुले च स्त्रियां मः ॥ शकुनस्तु पुमान्पक्षि
[illegible] ॥ शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकं ॥ पक्षावस्य स्तः ॥ इति ॥ द्विर्जायते ॥ अन्ये राम
ष्वपीति डः ॥ द्विजः स्याद् ब्राह्मणे दन्ते वैश्ये पक्षेऽण्डजे शुनी ॥ द्विजा भार्यांगीरेणुके च ॥३३॥ ॥ १०९

पतत्रं पत्रं वास्त्यस्य ॥ इतिः ॥ पत्री श्येने पत्ररथे कांडरुहे रथिके त्रिष्विति विश्वः ॥ पतेन पक्षेण गच्छति ॥ डः ॥ पतति प
ऌ गतौ ॥ शता ॥ पत्रं तत्रं रथा इव यस्य ॥ अंडाज्जायते स्म ॥ पंचम्यामिति डः ॥ अंडजो मृगनाभौ स्यात्सरटे खेचरे खगे झषे न
गोहस्तं तरे ग वा ॥ ओकोऽस्य ॥ नगौकाः पुंसि शरभे पक्षिपंचास्ययोरपि ॥ जजौकावद् दंतोपीति मुकुटः ॥ वाजाः प

पतत्रिपत्रिपतगपतत्पत्ररथांडजः नगौकोवाजिविकिरविविष्किरपतत्रयः ॥ ३४ ॥

त्राः संत्यस्य इति ॥ विकिरति ॥ कॄ विक्षेपे ॥ इगुपधेति कः ॥ वाति ॥ वा गतौ ॥ वातेर्डिच्चेति इञ् ॥ वेरौ ओ इद् इति स्वामी
मुकुटौ चिंत्यौ ॥ इवि ग्रत्यमस्य प्रकरणेस्य पावादौ चिरि इति रूपापत्तेः ॥ विष्किरः शकुनिर्वि इति पक्षे मुकुटः ॥ पत्रि इति
॥ मू इति अलं ॥ पतति ॥ पतेरत्रिन् ॥ उणादयो बहुलमिति पतेरत्रिरिति मुकुटः ॥ तत्सूत्राज्ञानमूलकः ॥ ३५ ॥ ॥

अ॰ टि॰ ११० कोडे उद्भवो येषां ॥ गरुतः पक्षाः संत्यस्य ॥ मतुप् ॥ रूपइतिवत्वंतुन ॥ यवादित्वात् ॥ तसौमत्वर्थे इति भत्वं ॥ पती तु मिथुनवः ॥ ल
द्रयाता ॥ सा तिमी मे तित्र ॥ नभसं खमिदं वर्त्म विहायसमिति निगमात् दूरं तान नभसं गच्छति ॥ गमश्चेति खच् ॥ नभसं विरगति
रते पक्षिणां भेदाः ॥ हारिः पथिकसंतानद्यूतादिभंगयोः स्त्रियां ॥ हारिमितः ॥ इतो वादारो स्त्यस्मिन् ॥ इति गच्छ्यति हारिमिनाहर
मितं गमनमस्य ॥ यद्वा हारयति ॥ क्विप् ॥ रातिस्म ॥ इ गतौ ॥ गत्यर्थे ति क्तः ॥ हा रवां मो वीतश्च ॥ हारीतः ॥ मज्जति भे

नीडोद्भवा गरुत्मंतः पित्संतो नभसंगमाः ॥ तेषां विशेषा हारीतो मद्गुः कारंडवः प्लवः ॥ ३५ ॥

देस्याके तवे वि ॥ हगांतरे इति हेमचंद्रः ॥ मज्जति द मद्गुः ॥ मज्जो स्तुद्रे ॥ मद्गुः जलकाकः ॥ त्यंघकादिः मद्गु [illegible] मद्गुः
पानीयकाकि केति ख्यातः ॥ रम रणे ॥ जमंता डः इति रमेर्डः ॥ ईस्परंड ॥ ईषदर्थे चेति कोः ॥ कारंडवाति ॥ आतोनु राम ११०
पेतिकः ॥ प्लवते प्लुङ् गतौ ॥ अच् ॥ प्लव स्तदेस्तु तौ कपो ॥ राष्ट्रे कारंडवस्तेछ जातौ भेलक भेकयोः कम तिल्व मही
भागकुल [illegible] वा यसे ॥ जलांतरप्लवां धत्तरास्तु ल्के मिद्यपीति हेमचंद्रः ॥ ३५ ॥ ॥

तित्तिरा इत्यं राति ॥ बाहुलकात्किः ॥ तित्तिरिः पक्षितित्तिमुना वितिङ्ठेमः ॥ अदंतपदे आतोऽनुपेतिकः ॥ कपोतात्नावति त्तिराऽ
तिवाचस्यति कुगित्यव्यक्तशब्दं कौति कुशब्दे ॥ बाहुल्यकात भकू ॥ कुक्कराद्वं भाषते वा ॥ भाषव्यक्तायां वापि चिः ॥ अन्येभ्यो
पीति डः ॥ क्वनकुक्कुटोयं ॥ लावयति भलु छेदने ॥ स्वार्थे रपत ॥ अच ॥ जीवंजीवश्व गांतरे कुमभेदेष ॥ कोरे चयति ॥ तदर्शनि
नवि [illegible] ॥ कत्पल्लुटेब छलमिति बाहुलकात्वच ॥ जीवजीवः खंगांतरे ॥ कुमभेदेचकोवरकेइतिहेमः चक

तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ॥ कोयष्टिष्टिट्टिभः कोकः ककरो वर्तिकादयः ॥३६॥

[illegible]त्सौ ॥ किंचिचकि स्यामीरन् ॥ स्वार्थे कन् ॥ कं जलं यष्टिरिवास्य ॥ पृषोदरादिः ॥ टिटि [illegible] ॥ दिदिरद्देनभा
षति वा ॥ [illegible] ॥ कच ॥ वर्त्तति ॥ वृतु वर्त्तने [illegible] ॥ दीचान्तइच्छं ॥ स्त्रियांमाचांते तिस्त्रियां रूपद्वयप्रदर्श
नाय वर्त्तिका [illegible] मिश्रांचं ॥ वर्त्तु तत्त्ववृतेस्त्विकन् इति तिके प्रत्ययस्य ॥ सृ स्विकवत्पुंस्यपि वर्त्ती कइति रूपक
थनमिदं ॥ वर्त्तक स्तुरघुरेस्य वि हंगवर्त्तिका द्वयोः ॥ आदिना शारवादयो ज्ञेयाः ॥३६॥ ॥

अ॰टी॰ १११

गिरति॥ग्ट निगरणे॥बाहु॥ गरु॥ गाति॥ गरुत्माष्टे॥ म॰ स्यात रुति॥ पत्रिति॥ पक्ष्ये॰ तेवा॥ पक्ष परिग्रहे॥ अच्॥ पक्ष्वा॥ सांतो
पि पक्षवान्॥ वक्ष्म तो पक्षाविति सुभांकः॥ पक्षस्तु मासार्धे गृहसाध्ययोः॥ चुल्लीरंध्रे बले पार्श्वे वर्गे केशात्परश्चमे पिच्छे विरोधे
देहांगे सहाये राजकुंजरे इति हैमः॥ छाद्यते अनेनांगं॥ छद संवरणे॥ पुंसीति घः॥ छादेर्घे इति ह्रस्वः॥ गरुत्पक्षोत
रौ छदमिति त्रीणि॥ कांडे बोपालितः॥ पतत्यनेन॥ दाम्नीति ष्ट्रन्॥ पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः॥ पतंत

॥ गरुडत्पक्षछदाः पत्रं पतत्रंच तनुरुहं॥ स्त्री पक्षतिः पक्षमूलं चंचुस्त्रोटिरुभे स्त्रियौ॥ ३७॥

त्रायते॥ त्रैङ् पालने॥ आतोऽनुपेति कः॥ पतेर्वा कित्वकादत्रन वात त्वां रोहति॥ [illegible]॥ पट पक्षस्य मूलं॥ पक्ष
त्रिः॥ द्वि पक्षमूलस्य॥ चंचति॥ चंचु गतौ॥ बाहुलकादुः॥ चंचूश्च तथा त्रोटिरिति डला [illegible] मित्रयोरिति पातितः॥ अप रा॰म॰
शब्दादित्वादित्यन्ये इति मुकुटः॥ तन्न॥ गणे ह्यस्योज्वलदत्तादिष्वदर्शनात्॥ चंचुः पंचांगुले द्यामिति हैमः॥ त्रोटपते॥ १११
त्रुट॰ छेदने॥ चुरादिः॥ अच्॥ इः॥ त्रोटिश्च घोरवर्गांतरे इति हैमः॥ दर्वी च इति ख्यातस्य॥ ३७॥

त्र यम्चं सिंगतं वा ॥ दृत्यनं ॥ ऊरू विहायसा ॥ तौ ॥ ... के मावेक स्वार यः ॥ ओदितइत्यादिना निष्ठानत्वं ॥ अंडीनं तिर्यग्गमनमित्यन्ये ॥ एता
इत्यनीनडेडीनाद्यावोध्या ॥ पक्तिरणा ॥ ति विशेषाणां पृथक्तृ थगेकेकं ॥ पिशति ॥ पिश अवयवे ॥ इति रायी ॥ ऋक्ष्णीतानु ॥ क दितिवा
धु ॥ कुथ्यति नि ... मत्पस्मा ... व ॥ अकर्त्तरिति घञ् ॥ नामद्वयमिदं पेशी स्तुपच्चक्र ॥ पशिके मांस्पारवऊ पिधानके ॥ मांस
पिंडामंड भेदे ॥ कोशो स्त्रीकु म्मले पात्रे पेशी पत्रपांशा हादि संग्रहे ॥ जातिकोशोर्थ संघाते दिव्येरवड्डु पिधानके ॥ तालव्यांतोप्य
यं कोशोस्त्री ॥ तिपथापठंति ॥ स्वामी तु पेशी नामांसकोशो भंडागाड तिव्याचष्टे ॥ नामेकमिदमिच्छति ॥ ह्रस्पांदीनेली वहल

७८

अ मत्पस्मात् ॥ अमनत्याहि वचु ॥ अमंताड्डः ॥ अंड मस्त्रेचपेवपास्यात ॥ ली शि अंडलगड इतिरव्यातस्य ॥ कुलं पक्षि संतानो पत्रे तत्र अथ्यग
तौ ॥ कुलक्षेतिघञ् ॥ पक्षाकोशायोगतिरस्मात कुलात्पर्यंतेभिस्मारंत्य कुलक्षेतिघञितिम्मुकुटः ॥ तन्न ॥ हलक्षेत्यत्र करणाधि
करणयोरित्यनुवृत्तेरपादाने प्राप्ते ॥ कुलायस्तु उमानस्थानमात्रे स्यात्पक्षिवासके ॥ नितराउं ज्ञाते ॥ घञ् ॥ ... निस्त्रि
इत्यत्र ॥ हलस्वमो हलक्षेतिघञ् ॥ संज्ञापूर्वकत्वाल्लगुणाभावः ॥ डलयोरेकत्वं ॥ नाडीस्थानकुलायपर्याये पक्षिवासस्य ॥ ३६ ॥ ॥

अ॰ टि॰ पुनातीति पवनं वा पूयते पवनं ।। स्निग्धि शिशुनितन ।। स्लो गोपोती ।। वयसि प्रथमऽर्भकः ।। पोतः शिशुः शेो वर्हिर्वे वच गतौ स्थाने वासमीति
११२ विस्व: पायते । पिबतिवा । पास्तरणे ।। पापाते वा अर्भकिः पृथुकपाकावयसीतिसाधुः ।। स्त्रि यात्मजादि त्वात्राप्त ।। मुकुटस्तु दग्ध ।। मेकी
तिकन् । पच्यते । परिणाम्यते । नेनद्दन्मृत्तिधाञिवेत्याहतन्न । अवयसि चरितार्थ भोवयसि अर्भके त्यनेन बाधनात् ।। पाकः परिण
तो शिशुः ।। किन्तु स्य जरसा शेो कुस्था ल्पारे पचनेपि चे त्ये सुश्रिमुभि न्ते पुमुपे कुटव्याख्यानमुक्तातिशेो त्यहीयेतिध्येयं अपते
दृढिं प्राप्यते ।। कुगतो प्रापरणेपि च अर्भकि पृथुकपाकावयसीतिसाधुः ।। मुकुटस्तु सदैव स्यात्रि बलति ।। वृद्धिं गच्छतिवा अर्तिगत्या

पोतः पाकोऽर्भको डिंभः पृथुकः शावकः शिशुः ।।

न: [illegible] र्थे कन्नि । तिकाख्यात् ।। तन्न अर्भकिः कम्पितो बाले मृत्वे पिचकरो पि चेत्यत्र बालमित्ते भावकाद्रास्मास्यव
यस्ये र्भके त्यनेन बाधनात् ।। डिंभयति । उ भिडिं भिमोघे चुरादिः ।। अच् ।। डि भो पि बालि शेो बाले ड ओ आत्मने पदित्वान्न ।। प्रय
तीतिस्वामी ।। उ यनंडी : ।। प्रा भा तीत्यादि मुकुटस्यो ह्यापि चे तो ।। पथ्य यति पथ्यति वा ।। पृथु प्रत्ते पे ।। कुरादिः ।। प्रथतेवा राम॰
।। प्रथ प्ररव्याने ।। अर्भक पृथुकपाकावयसीतिसाधुः प्रथुं कायतीति स्वामी मुकुटौ चिन्त्यो ।। पृथुक पुंसि चिपटेशि ११२
शो स्योर अभिधेयवादि त्यत्र पूर्ववदेव यसि चरितार्थ त्विनास्य वयसी विधानात् ।। शव्यते ।। शव गतौ ।। ।।

घञ् स्वार्थे कन् ॥ वृषंती वृषस्यंती वा ॥ श्रोतनुकरणे ग्रः किसलत्यः सत्वज्ञावादित्वे ॥ शारा तिष्ठन्ते गच्छति ॥ शरणागतो ॥ स्वि
र घोरत इति कुरिति मुकुटः क्षिप्नं त्यः उज्वल्दहत्वादिभ्य शिघोरत इति म्हत्वादर्शनात् ॥ सन्त सस्त्री चम्पमांसभक्षकत्व रेति अः मेथ
ति ॥ मिथ मेधृ संगमे ॥ क्षुधिपिशि मिथिभ्यः कित् इत्युनन् ॥ वाकुल कारुण्यभावः इति मुकुटः स्नुरणत सूत्राज्ञानमूलकः ॥ मि
थुनं नव्ययोराशि भेदे स्त्रीपुंसयुग्मके ॥ हैमः ॥ द्वंद्वं रहस्यैकलहे तथा मिथुनयुग्मयोः ॥ त्रीणि मुकुटः स्त्रकंठं हस्यो तरान्वयित्वमे
व स्वीकुर्वद्भुमे रिती विरोधात् फेरुः ॥ युज्यते ॥ युजिर योगे ॥ युजिक विति जांकुम्भैति मकू ॥ युग्मं यमज यामले इति रभसः

स्त्रीपुंसौ मिथुनं द्वंद्वं युग्मं तु युगलं युगं ॥ २६ ॥ समूहे निवहव्यूहसंदोहविसरव्रजाः ॥

हस्मादित्वात्कन् च ॥ न्वंझादित्वालुक् त्वं ॥ युगं लाति वा युगमस्य स्पवा ॥ सिध्मादित्वाद्भन्च ॥ युज्यते ॥ घञ् कुत्वं ॥ संज्ञापूर्वकत्वात्र
[illegible] गोरथे ... भेदस्त्व चतुष्के पिच्छिनामो जघेपिच ॥ त्रीणि य
मलस्य ॥ ३ ॥ ॥ समूह्यते ॥ ऊह वितर्के ॥ घञ् ॥ इल स्मेति मुकुट प्रमादः ॥ तत्र करणाधिकरणयोरित्यस्यानुवर्त्तनात् ॥ नित
रां समूह्यते ॥ वह प्रापणे ॥ पुंसीति घः ॥ वह मिधातौ अच् ॥ व्युह्यते ॥ घञ् ॥ व्यूहः स्याद्बलविन्यासे निर्माणे वृंदतर्कयोः ॥

अ॰टि॰टी॰ संद्रुह्यते॥ द्रुह प्रस्फुरणे॥ घञ्॥ विसरति॥ सृ गतौ॥ अच्॥ व्रज गतौ॥ अच्॥ व्रजो गोष्ठाध्ववृंदेषु॥ करणाधिकरण॥ धिकर
११३ णयोश्च त्यसंतौ नु गौचरसंचरे ति निपातः स्तूयते॥ ष्टुञ् स्तुतौ॥ अर्त्ति स्तुश्चिति मन्॥ आजह्यते ऽनेनाहलश्चेति घञ्॥ न्यंक्वादि
त्वात्कुत्वं॥ ओघो वेगे जलस्यापि च॥ वृंदे परायांच कृतत्वापदयोरिति विश्वः॥ निकीर्यते॥ कृ विक्षेपे॥ ऋदोरप्॥ निकरो निव
हे सारेन्याय्ये धने निधौ॥ व्रत्यते नियम्यते॥ मुड मिश्रीकरणं तात व्रतस्याद्यम्॥ घञ्॥ जातव्रज्यादिवत्॥ ति लिंगादृष्टिः॥ वार्यते
आच्छाद्यते ऽनेन॥ वृञ् वरणे॥ चुरादिः॥ पुंसि तिघः॥ वारः सूर्यादिवासरे॥ वारो हरे कुञ्जवृन्दे वेलायां रसरयोर्व्दारेण॥ संह

स्तोमौघनिकरव्रातवारसंघातसंचयाः॥४०॥ समुदायस्समुदयः समवायश्चयो गणः॥

न्यते घञ्॥ हन स्तो विरागे ऽपि॥ हलः॥ हन्तेरिति यत्संघातः पुंसि घातेच संहतौ नरकांतरे॥ संचीयते॥ चिञ् चयने॥ एरच्॥ राम
॥४०॥ समुदीयते॥ अय गतौ॥ घञ्॥ समुदायः समुदेस्याद्युद्धे ऽपि समुदीयते॥ इण् गतौ॥ अय गतौ वा॥ एरच्॥ मृ ११३
वेः समुदयः संघे मूले च समूह्य यसे॥ समवामत॥ अय गतौ॥ घञ्॥ चीयते॥ चिञ् च यने॥ एरच्॥ चयः समुदेप्राकारे
मूल बंधसमाकृतौ॥ गण्यते॥ गण संघाते॥ घञ्॥ अलोपस्यस्थानिवत्वान्न वृद्धिः॥ ॥

गण प्रथमसंख्योघे चंडी सैन्यप्रभिदयो ॥ संभूयैते ॥ कि व ॥ ह रणपते ॥ हणु भजे ॥ अ द्यादयश्चे तिसाधुः निकुरतिनि कुर्यते वा ॥ कुरब्छेदने ॥ बाफलकादं बच ॥ अतत स्वं च ॥ कु त्सितमं बतेअव्यते वा ॥ अबिदा ॥ अच ॥ घञ्वाकदतिकध ते वाकदिसौ त्रोधातु ॥ बाफलकादं बच ॥ केदेवं तिकुरुवे स्यात्तीसर्व ययोषुमान ॥ वा विंशति ॥ ४१ ॥ समूह विशेषानाह्न् ते ॥ समे रूपलब्धितं ॥ हज्यते ॥ हजि वर्जने घञ् ॥ कुर्लसंह स्यति घञ् ॥ संघा ही गणो वर्गः शं मयोरितिसाधुः स्मरतिसिय

स्त्रियां तु संहतिर्वृन्दं निकुरुम्बं कदम्बकं ॥ ४१ ॥ वृन्दभेदाः समैर्वर्गः संघ
सार्थौ तु जन्तुभिः ॥ सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकं ॥ ४२ ॥

यते वा ॥ स्त गतौ ॥ सिगतौ ॥ सर्पती रितन् ॥ इति थन् ॥ सार्थे वणिक् समूहे स्यात् ॥ निसंघातमात्रेके ॥ यू थादयश्चे तिसकु टश्चित्यः ॥ मातु रिक्त पर्यायतामाह ॥ संघसंघा तह जोघसार्थे मू कर ॥ इति ॥ उ सजी ती यरेकजं तभिरुपलब्धि तं ॥ कोलति ॥ कुलसंस्याने ॥ बंः धणुच ॥ गुथ्येति कः ॥ क लं जनपदे ॥ जातौ यूं गणे पि च ॥ यौति ॥ यूयते वा ॥ यूपि श्रणे ॥ ति थष्ट शत्य यूथश्चोष्ट याः इति साधु ॥ यूथं तिर्यक्समूहे ॥ भेदे चयोपिति ॥ ४२ ॥ ॥

अ॰ टि॰टी॰ ११८ संवीयते॰ वा। अजगतिक्षेपणयोः॥ समुदोरजः पशुषि त्यप्॥ समजः पशूनां वृंदे॥ वा पिनेन। पशुसंघ ॥ अन्यत्र। अ॰

संवीयते॰ ऽत्र वा। घञ्। नीचीयते। विजनचयने॥ संधे च॥ नौन्त्रराधये इति घञ्॥ आदे कश्चिनिकाय स्तु प्रमात्रस्ते सधर्मि

णां॥ संहतौ वृंदभेदा नाह यकृद्वयकृ। पिंजयति॥ पिंज्यते वा पिजि हिंसावलादान निकेतनेषु॥ अच्॥ घञ्‌ वा द्व

योरूरादिः॥ पञ्च। उल्लन्कपुमां संजयति। अन्येभ्योपीति डः॥ पुंज्यते॥ पुंजः इतिस्वामि॥ अस्तुते॥ अस्तु दुःका सोऽस्त्र

पशूनां समजो ऽन्येषां समाजो थ सधर्मिणां॥ स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियां॥ ४३

वियराम्य उरुधिथते सधो वृया डरहेश्रे॥ स्र वृथीद्गश्र्थ आशो॥ स्र तरअसेस्य॥ पशुसण डोड़ि॥ अजश्र्ति प्रडारेट इति व्याख्या इति॥ लग्ने इति पञ्जधा

क्षिप्यन्ते॰ ऽस्मिन्नयकृतकौ च॥ रीतं धातोरागमः॥ पञ्चरस्यते॥ रसास्तो त्र॰ राशयः॥ दी पूर्वद्गइति स्वामी वा कृत्वा का

दि रा। राशेस्ताद्वयत्वा राशिर्मि त्या॥ द्वि पृंजयो उत्कीर्यते॥ कृविक्षेपे॥ कवीरप्॥ कुट्यति भकुद्यतेवा॥ कुटा भ राम

दि रा। रापंतादयः। वा रा। श्मिर्मि त्या॥ द्वि पूंजयोउत्कीर्यते॥ कृविक्षेपे॥ कवीरप्॥ कुट्यतिभकुद्यतेवा। कुटकौ ११८

दाने॥ कुटदाहे॥ मंत्रे रावा॥ अच घञ्वा॥ कूटं पुंस्यपि यंत्र संमा यादं भादिः सगोष्ठे सीमांगोः नु तनुलय॥ निस्वलौ

यो घनेरशा विति डेमचंद्रः॥ चत्वारि धान्यादेरुच्छ्रितदंदस्य॥ ४३॥

तेषां कपोतशुकमयूरतित्तिराणां गणे शौकपोतानैतंशुकानां मायूरं तैत्तिराणां चेति गणे ऽनुदात्तादेरञ्॥ शुकानां समूहः शौकम्। अनुदात्तादेरञ् इत्यादिना काकं वार्त्तिकंउलूकं ढातो प्रदः॥ कपोतो रुचके क्लीबे कपोतो घञ्जनांतरे॥ शौकशुक गणे स्त्री णां कारणे॥ शौकं मयूरा॥ कपोतादीनां गणास्यः पृथक्॥ छच्छ॥ ति॥ छायते वा॥ छो छेदने॥ बाकूलकादाकन्॥ छेके गह॥ श्रितमृगपक्षिषु॥ छेकस्त्रिषु विदग्धेषु गृहासक्तमृगांडजेऽ नितिचवर्गादिरं तसः॥ गृह्यते॥ ग्रह उपादाने॥ पदास्वैरि बाह्या पक्षेषु चेति॥ कप्प्॥ ततो नुपायोकन्॥ गृह्यको निघ्नके छेके॥ ४४॥ इति सिंहादिवर्गविवरणम्॥ ॥मनोरपत्यं॥ मनोर्जातावञ्यतौ षुक्

कपोतशौकमायूरतैत्तिराः तित्तिरणे॥ गृह्यासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते॥ ४४॥ इति सिंहादिवर्गः॥ ॥मनुष्या मानुषा मर्त्या मनुजा मानवा नराः॥१॥

स्त्रियां तु पगांवयेति॥ मेउ। पूहलत द्वितस्मे तियलोपः॥ मनुष्याद्विते तिमानुषीजातिविवक्षायाडीषःपरद्जनत्वाड नम्ते॥ मृङ् प्राणत्यागे॥ हसिमृग्रिण्ति तितनुस्वार्थे यत् मनोर्जाता॥ जना ग्राजुन्वि॥ पंचम्पामि ति॥ड॥ मनोरयं तस्मेदमित्यण् यद्वा॥ मनोरसं॥ बाह्मणमानवेति स्ताप कारणम्॥ स्त्रियां पुषु गनावोवा॥ औपम्स्यानिके गीतिमुकुटश्चात्यः॥ उपसंस्यातानावान्॥ नरति॥ नरणा निवा॥ नृ। दयेञ्च॥ नरोजेमवुजेडुनि॥ क्लीबं नुणमकर्पुरं॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अ॰ टी॰ नयंति पूर्वपुरुषानुन्नमांण तिं नयते। डिंचे तिक्तन्॥ टित्वाटि ङोप इति मुकुटः॥ तन्नं। एवं मत्यदंतरूपानापतेऋदतरु

११५ पपत्ते। ऋदं तस्मवद्वमाराग्याच॥ षट्‌मनुष्यमात्रस्य। याति। पारस्तरोः। पतेर्डमूसन्॥ क चित्तप्ट ओडुमग्मुनिगी

ति पाठः॥ पुनाति॥ पूञ्‌ पवने॥ पंच मिभ्रं तेजन्यते॥ घञ्॥ जनी वध्योश्चेति नवृद्धिः॥ यद्र॥ पंचजनाऽत्वादकाष्यस्म

॥ पूरति॥ पूर अन्नगमने॥ छरः कृपन्॥ पृषोदरादित्वाद्दीर्घः॥ नयति॥ नयते डिंचेऋ तृन्॥ पंचमनुष्यजातौ

पुरुषस्य स्यायते॥ भेस्यां स्थायतेर्डः॥ डटिलोपः॥ रिडे तिडीप॥ योषति॥ युष्यते वा॥ युषसौ त्रसिषाम यांजनेवा॥ गम्हरु

स्युः पुमांसः पंचमनाः पुरुषाः पूरुषा नरः॥१॥ स्त्री योषिदबला योषा नारी सीमंतिनी वधूः॥

हि युषि स्पृइति॥ योष्यते स्मरिणजं ताल्क मेरिणकः॥ स्त्री वधूर्योषि तारामे तित्रिकांड शेष॥ अल्पं बलमस्या॥ अल्पार्थे नि

ञ्॥ योषयति वा॥ अच्॥ युष्यते॥ योष्यते वा॥ घञ्॥ वर्गादिपावे जुषति॥ जुष्यते। वा जुषी प्रीति सेवनयोः॥ अच् घञ् राम

... तिज्जुनु कृतस्य क्रमादः॥ नरस्योवृद्धिश्चेति षडीषोपवादः॥ डी॥ स्त्रनी योगेन वृद्धिस्य मुकुट सन्तु जरैतर ११५

स्य वा धर्मे ... स्यान्न नरा भ्पांचेत्यञ्॥ वृद्धिः॥ टिड्ढाणे तिडीप॥ नारी तु न ... तारीति वि

त्वाड॥ तन्न॥ न नरे ... त्वात्तस्येदमित्यण॥ नर ... रितस्पवैयथ्यी॥

प्रसंगात् [illegible] पुरंध्री नो सुचरित्रे चरित्रे च सती स्त्रीः तरा कंध्यादि सीमंतिन्यस्याः इति ॥ वदति ॥ उद्यते वा ॥ वदो धस्येति मुकुट
स्तु वधात्यविस्मयाच्च मितनिवधेभ्य उत्तरित्यादि ॥ तन्न ॥ कृषि च मितनिवनि सर्जिभ्यस्वजि त्यजरितिसूत्रे वतं धेस्य दस्य
वनवी [illegible] वधिधिरदस्तु निाच प्रती मंक्रष्टुं स्त्री जमस्याः अपांगान्निरीक्षते ॥ त ॥ तासु प्रजाता विति णीतिः वमतिस्त्रैस्तु वमूर्छ्ठि
रणे ॥ ज्वलादित्वाण्णः ॥ स्त्रह ॥ वामः कामो स्त्यस्याः वामं धत्ते पुंसि हरे कामदेवे पयोधरे ॥ वनसंभक्तौ ॥ [illegible] नकादित्वात् ॥ स्त्रह ॥ व
न्यते स्मा क्त वति ता जात राग स्त्री स्त्रियो स्त्री त्रिषु मान्विते सेविते महति ॥ मह्यते वा ॥ मह पूजायां सलिकल्यनिमही

प्री प्रतीपदर्शनी वामा वनिता महिला तथा ॥ २ ॥ विशेषास्त्वंगना भीरु कामिनी वामलोचना ॥

ती जच ॥ मह स्यज्रस्सवस्य इलच् ॥ म्हिलि ति क्तिन्नि हेमच्चापि एकादशस्त्री मात्रस्य ॥ स्त्री णां विशेषा भेदाः प्रकारास्तान्नामान्यः
स्या अंगात्कोत्कारणेन इतितः ॥ अंगनां अंगाणि मानेष्वं गान्गं नुमन्ति तंबीनी इत्यतिहैमः ॥ नयत्रीला ॥ त्रि भी ॥ भमियः ॥ कु
कुक [illegible] कु भीरुस्या कातरेनायामित्यजयः ॥ भीरुरग ते जते स्त्रियामिति रभसः ॥ भीरुरते त्रि लिंगः स्याद्
सो जति भूपान [illegible] इति ॥ कामिनी भीरु वंदयो ॥ वावमः कामो लोचने नेत्रे वास्या

अ॰टि॰टी॰ यद्वा वसिसुन्दरे लोचने चक्षुषी यस्याः प्रमदोत्कर्षोऽस्त्यस्याः प्रमदः ॥ मस्मदे मत्ते स्त्रियामुत्तमदृष्योषिति प्रमत्ताऽस्त्वि तोव्लतैत्यद्भिः मानो
११६ ऽस्यस्या इति मानिनी तुल्ली यांक ल्यां मान्तिमानवति त्रिषु ॥ कम्यते स्म ॥ कमुकांतौ णिङ् भावे क्तः ॥ कांता स्याच्च प्रियंगौ स्त्री
शोभने त्रिषु नाधवे लो हि चवं जस्तूर्या यप मयात्तु शिलास्तु च ॥ ललते ॥ ललनइ [illegible] ॥ दादिनांवा रिमिजि ति पद्देल्लुः
पृ॰ च्चा ॥ यद्वा ॥ लडति ॥ लड विलासे ॥ नकुलमन्यत्रापि ति वृन्दा ॥ उलयोरेकलं ॥ ललना कामीनी नारी भेदजिज्ञासुः यो
षीतीति विष्वमेदित्यो ॥ अतिशयमिता नितंबोयस्या इति ॥ ॐ ॥ अती बलेत नन्ती ॥ नदी कौंदने ॥ सुपूर्व बाकुलकाद रः ॥ श

प्रमदा मानिनी कांता ललना च नितंबिनी ॥४॥ सुंदरी रमणी रामा कोपना सैव भामिनी ॥

कं ध्वा दिगौरादि सुंदरी तरुं भिन्नारी भिदेः स्त्री रु चिरे न्प वल ॥ रम मती ॥ रम्यते ऽस्यां वा ॥ रम्यते ल्पुट् ॥ रत मतेज
जादित्वा स्म ॥ रमयती ति तुस्तुकुट प्रमादः ॥ रापंत ज्वला भावात् मित्यो त्वा स्मि निमि त्तद्धा भावाच्च रामत्पो मेडला
पृ [illegible] दृ सि ति चारो राघ वै रेण कासु ते ॥ रामं तु वारुणु केतु ष्टे रामादि तु लिनी स्त्रि योरिति हैम ॥ उत्कृष्ट स्त्री राम
विरो षा णां ट्य कल्प यक् ॥ कुप्यति तच्छीला ॥ कुपक्रोधे ॥ कु धमंडार्थे भ्पश्चेति यूष ॥ अवद्धं भामते ॥ भाम क्रोधे ॥ ११६
व त्पकेति णाति ॥ ट द्यो दिरिणि नि वार्द्धे को यन स्त्रियः ॥ ॥

वरं आरोहो स्तितंबोस्यामत्ता स्त्री वेवक्कारतिभाति॥ क त्रं स्पृ पमानेड इति रिा नि॥ उत्पस पद्दे कस्तगती [illegible]
त्कर्णा यंडे छह्या त्तम पृ द्रव्य प्रकर्प त्वात॥ वररणे स्त्पस्याइति श्री ते सुरवोलस वंगीप्ती प्प्मासुरव श्री तलाभ
तेभ क्का च [illegible] री सा भृ वेहरवरिाणिनी तिरुद्द:॥ चत्वारी अत्यंतो त्कट स्त्रिया:॥६॥ कृता भिषेकोस्या:मस्पते
॥ मह ह जायां॥ अविमह्योष्टि पच॥ मदिषीन्तपयोपि तिसे रिभ्या मो पधी नेदे इति हे मचंद्र:॥ राकं अतिरा [illegible]

वरारोहा मत्त कासिन्युत्तमावरवर्णिनी॥६॥ कृताभिषेका महिषी
भोगिन्योन्यान्टपस्त्रियः॥ पत्नी पाणिगृहीता च द्वितीया सहधर्मिणी॥४॥

भोगोस्या इति:॥ विहाय महिषीमन्य राजयोषितियोगिनी॥ राकं। पत्युर्यज्ञेयं योगी यस्या:दंपत्यो सहा धिकारात्
पत्नुतो यज्ञसंयोगे। पाणिगृहीतास्या:पाणिगृहीभार्यामामितिङी पू॥ द्वयो द्वरणी द्वितीया य: द्वितीयाति। ग
हिन्यो द्वितीय: द्वरणो द्वयोरितिहेमचंद्र: [illegible] स्त्पस्या:॥ पत्यासहक र्मस्वधिकारात्॥ धर्मश्री जवरणीति
चेतिती [illegible] नस्येति सहस्मवास:॥४॥ ॥

अ.द्वि.टी. ह्रियते ॥ भ्रियते वा ॥ डुभृञ् धारणपोषणयोः ॥ भृञ् भरणे ॥ वा स्त्रियां तु संज्ञायां भृञः क्यप् ॥ ऋहलोर्ण्यत् ॥ इति स्वामी या
१६७ स्यात् । तत्र संज्ञायां समज निषद इति क्यप् ॥ ण्यतोऽपवादत्वात् ॥ संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति ॥ तदनुबंध ग्रहणेन तदनु
बंधकस्येति न्यायात् डुभृञ एव क्यप् नतु भृञः ॥ जायते अस्यां जाया ॥ जनेर्यक् ॥ जायायां जायते हि जाया ॥ पत्युर्जायात्वं यदस्यां जायते पुनः ॥ इति
मनुः ॥ दारयन्ति ॥ दृ विदारणे णिजंतः ॥ दारजारौ कर्तरि णिलुक् ॥ इति घञ् ॥ यद्यपि दारयते ॥ पचाद्यच् ॥ सिद्धं स्वर

भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुंबिनी ॥

त्वार्थम् ॥ कृषीवल इति धूर्ज्येष्ठौ ॥ दारास्तथा प्रयत्नकाः ॥ पिष्टिकः ॥ धनार्थिभिः ॥ दंडनीतौ पिककोऽलक्वापरः पुंसि राम
दारान् भरेत यथाक्रमम् ॥ कोडो हारेच दारेषु भ्राक्षीणो काः मनी ॥ इति हेमचंद्रात् ॥ स समृद्धं कुटुंबमस्या अस्ति १६७
इति कुटुंबिनी ॥ कुटुंबिनी पुरंध्री स्यात् ॥ पुरं धत्ते ॥ धत्र धारणे ॥ स्वार्थे ण्यंतः संज्ञायां भृत
वि तिरव च ॥ रवव्यक्तस्य ॥ गौरादि ॥ हलंतादिषु गुणधाकिरीतिमुकुटः ॥ ॥

नत्त।धरतेर्ड्लृतत्वेगुपधत्वमोरभावात् ६ पू ...हिमत्वा सधवा॥शोभनं चरित्रमस्याः अस्ति एकस्मिन्पत्यौ अ
सक्तिर्यस्याः स्त्रसैरलोपः जगितश्च्वितिडी) प्रसता साध्वी धीरस्त्री योमान्ये सत्ये विमाने त्रिषु साधुमयोः स्त्रियां साध्नोति पर
लोकं।साध्नतस्मिंदे --वायत्नुग्र।वीतोसुरोतिकाळीप्र पत्यौ व्रतं नियमोऽस्याः॥पतिव्रतमस्याः॥पति...पतिसेवा यो
यां।जात्वारिकः चत्वारि॥६॥सपत्न्येवास्वार्थे कन्॥कृता सपत्निकायस्याः॥कृतसापत्नीके इति क्वचित्पाठः सपत्न्याभा

पुरंध्री सुचरित्रा तु सती साध्वी पतिव्रता॥६॥कृतसापत्निकाध्यूढाधिविन्नाथ स्वयंवरा॥

मे ष्यञ् ... यलो ...र्थे कन् ह्रस्वत्वं च कृता सापत्निका यस्याः॥क्वचित्कृतसापत्नके इति पाठः॥सपत्न्या आगतं तत आगत
त इत्यण्स्वार्थे कन् कृतं सापत्नकमस्याः अस्तुपीपिस्मुदि समाहित अधिपरि कह्म ... ऊढा इत्यस्याः॥अध्यूढा तत्सापत्नीकान्या कृ
ताथी मध्यूढ ... इति विश्वमेदिन्यौ अधिरुपरि विन्ना नोऽस्याः॥ ... अधिरुपरि विन्ना नोऽस्याः॥ ... ॥अधि
का वि ता लचा यस्या स्त्री॥ अनेन भार्यस्य प्रथम ऊढा या॥स्वयं वृणीते ... संज्ञायां ... इति स्वच॥ ॥

अ॰ टी॰ पंच । पतिं वृणोति ॥ म्रियते न या ॥ अवद्यपरापे त्वनिरोधे यत् । त्रिणीस्थितृछ कृतपतिकरणाया ॥ कुलपालिका स्त्री शाक
२२८ पार्थिवादिः । कुलं पालयति ॥ पालेरक्तरणि । कर्मण्यण् । स्वार्थे कन् ॥ हि व्यभिचारचारीणी न कृतकुलरक्षाया ॥ शाक
ल्तति कलदी सौ ॥ अंघ्रादिः । कन्यानायां कुमार्यां चरा रैपाश्वधविवरोष्योरिति हेमः ॥ कम्यते ॥ कनु कांतौ ॥ कमेर्यक्
ह्रस्वोपधाया इत्यत् ॥ वयसि प्रथमे इति ङीप् । कन्यायाः कनीन चेति लिंगात् ॥ पूर्वं चेत् कुननयत् कुमारयति ॥ कुमार
क्रीडायां ॥ अच् ॥ कुत्सितो मारो स्या वा ॥ कन्या कुमारी कानायों रोपधी राशि भेदयोः ॥ कुमारस्याः छंके स्कंदे शुवरा

पतिंवराच वर्यान्त्र कुलस्त्री कुलपालिका ॥७॥ कन्या कुमारी गौरी तु नग्निकानागतार्तवा ॥

समानं मानमस्येति वा ॥ समानस्य छंदसीति स सदृक्षे स द्वे वाच्यलिंगाः ॥ अमी निभादयस्तूत्तरपद २७६
स्थाएव सदृशवचना ॥ वाच्यलिंगास्तु यथा पितृनिभः सुतः ॥ मातृनिभा कन्या देवनिभमपत्यमिति ॥

नियतं भाति। अतश्चोपसर्गे इति। निभस्य [illegible] तो व्याजेषु छिद्रा। सदृशे त्रिषु॥ संकाशते॥ काशृ दीप्तौ॥ अच्॥ संका-
शसदृशे इति के [illegible] इति तरांकः नतेः इति दीर्घः॥ निकाशो निश्चये तुल्ये इति विश्वः॥ प्रतिकाशोते आदिनाभू-
तरूपकल्पादिमदः पथ्यापितृभूतः पितृरूपः। पितृकल्पः॥३७॥ कर्मण्याः संपद्यते। कर्मण्ये साधु

निभसंकाशनीकाशप्रतीकाशोपमादयः॥३७॥ कर्मण्यान्तु विधान्तस्यान्तयो भर्मवेतनं॥

तत्र साधुरिति यत्॥ कर्मणि विधाते नयाद्युधान्तः॥ आतश्चोपसर्गे इत्यङ्॥ त्रीयते कर्म क्रियाऽनया॥ भृत्य-
भरणे मं ह्यायां समजेतिक्यप्॥ कर्मणि भृता विवित निर्देशात् क्तिन् लिप्सियतेऽनेन भृत्य॥ भृत्य वा॥ मनि-
नु [illegible]॥ वा पति भ्यांत तत्र॥ भरणे साधु तत्र साधुरिति यत्। भ्रियतेऽनेन तत्पुरः। भरणं वेतनं भृता-
विति विश्वः॥ ॥

मूले नजोआनाम्यां नौभ्वयोर्धर्मे तियत॥मूलस्याद्दिघतनेरलेशतिविभ्कः॥निर्विस्यतेअनेनवा॥विशप्रवेशने॥अकर्त
रिचेति कलचेवा॥घञ्॥निर्वेस्मस्तपुमानयोगेचेतनेमूर्छनेपिवापरापंतेनित्यं परगः परिमारोऽत्यरा॥पुंसीतिद्योवा
॥परोविराटमानेस्यान्मूलेकापिपरोमटदेकथ्यकारणादिकैधूमभ्वडावसुरेस्थस्म तोधतराकादशः॥३९॥सुर

भरणंभरणोमूल्संतिवेशः परगइत्यपि॥३९॥सुराब्लिप्रियाद्भालापरिस्कन्दरणात्मजा॥

रांति॥यांरांदानेसुअतिवगघांत्यनयावा॥रैशब्दे॥आतश्चोपसर्गेइत्यउ॥सुराचरवकमद्यूयो॥कम्हिंग॥स्त्रिवि
वेशोघात॥ तालु त्रिनीवल्स्य प्रियादलयोगंदलविलेखने॥ज्वलादिणः॥दल्यतेऽनमावाड लश्चेतिघञ्॥बाला
रशानिवादन॥पाणिबोडालामुराया मिति विभ्क॥परितःभवति॥कण्यभ्रवरो॥क्विपूउकूवरुणालयो विपिव
रुणः तस्यात्मजा॥ ॥

गंधेनोत्तमा गंधउत्तमो यस्या वा राजदंतादिः ॥ प्रसिदति स्म ॥ षिदू विशरणगत्यवसादनेषु ॥ गत्यर्थाकर्मकेति क्तः ॥ रदाभ्यामिति निष्ठान
त्वं प्रसन्ना स्त्री सुरायां स्यादच्छसंतुष्टयोस्त्रिषु ॥ इरामराति रादाने ॥ आतोनुपेति कः ॥ कुत्सितं अंबरं कुगतीति समासः केचि
त्तु कबे पिकं दंबरं नीलांबरमस्या स्त्री ॥ अजाद्याच ॥ तस्येदमित्यण् ॥ कदंबे जातो रस ॥ तत्र जात इत्यण् ॥ कादंबर्यादिवा
कः गौरादिः ॥ कादंबरः स्कंदध्यग्रे मद्यभेदेनेषु सकं ॥ स्त्री वारुणी परभृता भारती सारिका सु च ॥ नागुर मदैतेद्य

गंधोत्तमा प्रसन्नेरा कादंबर्यः परिस्रुता ॥ ३९ ॥ मदिरा कश्यमद्ये चाप्यवदंशस्तु भक्षणं ॥

पि परिस्रुता ॥ स्रु ॥ परितः स्रुयते स्मन्नेकेः स्रुगतौ क्तः ॥ परिस्रुता स्त्री चारुण्यां स्यात्ते तेस्या दभिधेयवत् ॥ ३९ ॥ माद्य
त्यनया ॥ मदी हर्षे इति ॥ मदिमुदिला किरच् ॥ कश्यतेऽनेन वा ॥ कश शिष्टबाधनकाद्युः ॥ मद्यास्वमध्यपोकश्यमि
तिरंतिदेवः ॥ कश्यं क्लिष्टक शार्हे स्यात् क्लीबं मद्यास्वमध्ययोरिति विश्वः ॥ माद्यंत्यनेन ॥ गदमदचरयमश्चानुपसर्गे इति यत् त्र
योदश मद्यसामान्यस्य ॥ अवदंश्यते ॥ दंश दशने ॥ कर्मणि घञ् ॥ भावे वा एकपानरुचिजनभक्षणस्य ॥ ॥

स्रूयते॥ स्रु गतौ॥ अमंतात्‌ डुः॥ स्रुंडा यान गरिहे मता॥ सुंडापि जलहस्तिन्यां मदिराकरिहस्तयोरिति विश्वः॥ पिबंत्यनया
पा पाने॥ अधिकरणे ल्युट्॥ पानं पीतिर्भोजनवच्च॥ गोष्ठस्य स्थानं त्रीणि॥ मधुनो वारः मधुनः क्रमः॥ द्वे मधुपानाव
सरस्य॥ ४०॥ मधुकपुष्पमेधु तस्यासवः मधुना कृतः संधितः॥ कुलालादिभ्यो वुञ्॥ मन्यते॥ मन ज्ञाने॥ कलिपालि
ति साधुः॥ मधुपुष्परसे क्षौद्रे मद्ये नातु मधुद्रुमे॥ वसंतदैत्यनि द्वे वेस्या जीजो वेत्यानु याधितिड इति विश्वः॥ द्वित्यौ

सुंडापानमदस्थानं मधुवारा मधुक्रमाः॥ ४०॥ मध्वासवो माधवको मधु माध्वीकमद्वयोः॥

मध्वीका द्राक्षा तस्या विकारः॥ तस्य वि॥ कारड् त्यरा॥ अनुदात्तादेरञ् वा केचित्तु माध्विकमिति पठंति॥ तत्र पृषोद
रादित्वं॥ आद्यो रिति क्लीबमित्यन्ये॥ २ ॥ चत्वारि मधुकपुष्पकृतमद्यस्य॥ स्वामी तु द्वौ द्वौ पर्याया वद्व मिरा
यां देशविशेषे औषधिविशेषे वा भवं॥ नं घादि स्योटकू॥ आस्रुतेः ॥

षुञ् अभिषवे। रू दोरप्॥ शेरते ऽनेन शीधुः शीङो धुक्॥ अर्धर्चादिः पुंनपुंसकयोः॥ अर्कजीवानुस्थाणुसिंधव इति त्रिकांडशेषः॥ यद्य
पि सुल्लुरिक्षुरसैः पक्वैरासवो भवेत्॥ मैरेयं धातकीपुष्पगुडधानाम्बुसंहितमिति माधवस्तथापि भेदमनादृत्योक्तं॥ त्री
णि मद्यभेदानि॥ दुमि मिदा स्नेहने॥ क्वुन्॥ आदिर्भ्यो वुञ्॥ मदं गालति॥ गल्यते वा॥ गल अदने॥ यङ्लुगंतात् संज्ञापूर्वका
त्वाद्दीर्घो किंतइ ति न दीर्घः॥ जगलो मदमदुमे॥ मेदके पिष्टमेदो च दे सुराकल्कस्य॥ ४२॥ संधीयते॥ डुधाञ् ल्युट्

मैरेयमासवः सीधुर्मेदको जगलः समौ॥ ४२॥ संधानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः॥

॥ संधानं स्याद् अभिषवे तथा संघट्टनेऽपि चेति विश्वः॥ अभिषूयते॥ षुञ् अभिषवे॥ ऋदोरप्॥ भावे वा मुडयो॥ नवे द्र
व्याभिषवः स्नाने मद्यसंधानयज्ञयोरिति विश्वः॥ द्वे आम्नादिसंधानस्य कणानेक शाक्षादे॥ उल्वादयस्त्वेतिसा
धु॥ कर्मणि वा। किण्वं चापि सुराबीज इति विश्वः॥ क्वणनं क्रियते वा॥ क्वण संप्रदाने॥ किपूनन्तस्य कः हृतानादव्य
कृतं सुराबीजस्य॥ नग्नतनग्नकृता क्वानस्येतस्य॥ कारेण॥ क्रिया या जनरः सुरायाः मंड॥

अ॰ द्वि॰ टी॰
२७९

कारोत्तम इति स्वामि ॥ हे आसंनह्यति चं त्यत्रल्युट् ॥ पातस्य गोष्ठी स्वार्थे कः ॥ ६२ ॥ चष्यते ऽनेन ॥ चषभक्षणे ॥ कनू चषकोऽस्त्री
सुपात्रे मद्य प्रभेदयोः ॥ पानस्य पात्रं द्वे स्त्रियते ॥ सृगतौ ॥ कृञादिभ्यो वुन् ऊ सरकः ॥ त्रिधु माने स्त्रु शीधुर्नेमधुनाज्वनेइत्य
नाय ॥ अपि शब्दात् सरको ऽप्यस्त्री सरसंरकं वा ना ऽनुतर्षोऽ नि तिरत्नकोशः ॥ अनुतर्षणं ॥ अनेनवाति तृषापिपासायां भावे
करणे वा ल्युट् ॥ घञि अनुतर्षोऽपि चषक स्यात्तु तर्षश्चेति भागुरिः ॥ द्वे मद्यपानस्य ॥ चत्वारि मद्यपानस्य ॥ चत्वारि मद्य

कारोत्तमः सुरामण्ड आपानं पानगोष्ठिका ॥ ६२ ॥ चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणं ॥ धूर्तो ऽक्ष
देविकीतवोऽक्षधूर्तो द्यूतकृत्समाः ॥ पानपात्रस्येति मुकुटः ॥ धूर्वीति ॥ धूर्वी हिंसायां हसि मृग्नाणीति तन् ॥ राल्लो
पः ॥ धूर्तं त्विति खंड प्रकरोधत्रूरैनावि ॥ टेन्निषुधात्तशन ॥ तिपवि धावनं ॥ धावुगतौ ॥ संपदादि ॥ बाहुलकात् जोप ॥ धाभावे
ने न अतिः धात्ति रस्यास्ति ज्योत्स्नापन्न ॥ यद्वा धावनेन आर्त्तः ॥ अभेदी व्यतिसुपीति ॥ णिनिः ॥ किं ज्ञाने भावे क्तः ॥ कितवाय
ति ॥ कितेन वा तिवा ॥ ओवै शोषणे वा गंधने ॥ आतोनुपेतिकः ॥ कितवोऽर्त्तवन्मते वं च केकनकाकये इति विश्वः ॥
अक्षे सु धूर्ती ॥ सप्तमी शौंडेति समासः ॥ द्यूतं करोतीति क्विप् ॥ पंच ॥ ४३ ॥

राम
२७९

लज्जते स्म ॥ ओ लस्जी व्रीडे ॥ गत्यर्थेति क्तः ॥ स्वार्थे कः प्रतिनिधिर्भवति किम् ॥ छिजमान इति ख्याता तस्य सभा द्यूतमा
श्रयत्वेनास्यास्ति ॥ व्रीह्यादित्वाद्ठन् ॥ सभा द्यूतं सभायां हितमिति ढः ॥ द्यूतं कारयति अण् स्वार्थे कः ॥ शकुनी तु द्यूतस्य
कारकः ॥ छिदि वनं दीव्‌ क्रीडादौ भावे क्तः ॥ अक्षाः पाशकाः सन्त्यस्याः ॥ मतुप् ॥ लोकात्स्त्रीत्वं ॥ कितवस्य कर्म युवा
दित्वादण् कैतवः कैतवे रिपोपरणो ॥ दीव्यन्त्यस्मिन् अश्‌ आद्यच् ॥ चत्वारि ॥ ४४ ॥ पणायतेऽस्रज्यते पणः इतियो

स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः । द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ४४ ॥ पणो
ऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ॥

गविभागात् अक्षराः ग्लह्यते अनेन वा ॥ ग्लह आदाने कुंसादिति घञ्
अक्षे इति घञ् संज्ञापूर्वकत्वान्न वृद्धिः ॥ दीव्यते ज्ञाप्यमानस्य अक्षु व्याप्तौ ॥ अच् ॥ अक्षो ज्ञानात्मशकटावयवे द्युते
पाशके रुद्राक्षाक्षयोः सर्प्पे ॥ विभीतकाख्यफलके कर्षे उमा क्लीब मक्षसौवर्चलेन्द्रियं ॥ दीव्यंति येन करणे
ति ल्युट् ॥ देवनं व्यवहारे स्यात् जिगीषा क्रीडयोरपि ॥ अक्षे तु देवनः प्रोक्त इति विश्वः ॥ पाशयति ॥ पाश बंधने ॥

अ॰ द्वि॰ टी॰
२८० चुरादि॥ एवुल्‌र्‌कुलात्रीरि॥ परितो वा प्रसद्धितो नयनं। निरूपपरिणयोरिति घञ्॥ राकं॥५५॥ पंक्तौ पंक्तौ अष्टौ पदान्यस्य
अष्टनः संज्ञायामिति दीर्घः॥ अष्टापदमस्त्रियां शारी शारीणां फलं पद अष्टापदे ऽस्त्री फलै के सारीणां फलके पि चे ति मे
दिनिः फलहेतु समुस्थेस्यात्फलके क्षुष्टिलोमयोरिति विश्वः॥ सारीणां खेलनाधारपट्टस्य हे शारी नि:। कृतं च्छूतं स

परिणायस्तु शारीणां समंतान्नयनेऽस्त्रियौ॥ अष्टापदं शारीफलं प्राणिद्यूतं समाह्वयः॥ ६६॥ उक्ता
: स्त्रू रिश्र योगत्वादेकस्मिन्प्येत्र यौगिकाः॥ ताहृग्न्यादिन्यतो वृत्ता वृत्वा लिंगांतरेपि ते॥ ६७॥ ॥

म्यगाहृयं तेऽ त्रेहे न्त्र॥ पुंसीति निं घावाबाऊलकान्तत्वं हे॥ सर्वलिंगासंग्रहसंग्रहणतां परिहरति॥ उक्ता इति अ २८०
त्रवर्गे ये यौगिकादेशाक्ष॥ मालाकारमाहृ गिकवेणविकादयः॥ पुंसि प्रभुरघ योगदर्शनादेकस्मिन्नलिंगेयुं
सि ये यौगिकाउक्तास्ते ताहृग्न्यातियो॥ योगवशानेयामन्यतेऽ न्यत्रजा तौसत्यां॥ अन्यत्र स्त्रियां क्लीबे वानडतिया

 यथामालाकारी स्त्रीमालाकारकुलमित्यादि ये यथा यौगिकाकरणं मालिककुंभकारादयस्ते जातिवचनत्वात् शूद्रादि
 वज्जातेरित्याजीदीक्षितानां लिंगांतरे स्त्रीलिंगे क्लीबत्वेपि बोद्धव्याः॥४७॥ ॥इति शूद्रवर्गसमाप्तः॥ ॥इति श्री वंघेल

॥इति शूद्रवर्गः॥ ॥इत्यमरसिंहकृतौ नामलिंगानुशासने द्वितीयः कांडः समाप्तः॥२॥ ॥

वंशोत्तंसश्री महीधरविजयश्रीधिपश्री महाराजकुमारश्री कीर्तिसिंहदेवाज्ञया श्री भट्टोजिदीक्षितात्मजश्री
भानुजी दीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां द्वितीयकांडः समाप्तः॥ समाप्तोयं नृकांडः द्वि
तीयः॥ ॥

द्वि॰स्कं॰
२८९

॥ द्वितीयस्कंधः समाप्तः ॥ ॥पुस्त २८९

२८९

अ॰ टी॰ १ ॥ ॥ श्रीगणेशाय नमः ॥ इह सामान्यकाण्डे एतैः कृत्वा उपसिमा वा वर्गा विधीयंते ॥ कीदृशास्ते वर्गाः स्वर्गादयः सं
श्रयः आश्रयो येषां ते सुकृत्वादयो देवासुरमनुष्येष्वेव विशेषणत्वेन कर्मपारायणाद यौर ...पारतया... बध्यते लिंगा
त्यादेः त्येषां तानि ॥ तेषां संग्रहाः ॥ आदितानामानि लंकाशेफालिकोत्साम्यादिनि ॥१॥ अस्मिन् वर्गे लिंगज्ञानोपायमाह
स्त्रीति ॥ स्त्रीदारकलत्रादिभिः पदैर्यल्लिंगसंख्याविशिष्टैः स्त्रीदारकलत्रा हि द्विरूपं पठितोरोष्यं प्रकृतां तं गुण

॥ श्रीगणेशाय नमः ॥ ॥ विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ॥ लिंगादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥१॥
॥ स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ॥ गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ सुकृती पुण्यवान्
धन्यो महेच्छस्तु महाशयः ॥

द्रव्यक्रियाशब्दास्तल्लिंगसंख्याविशिष्टास्तस्य विशेषणानि स्युः ॥ तथा हि सुकृतिनी स्त्री सुकृ
दिनो दाराः ॥ सुकृति कलत्रं ॥ दंडिनी दाराः दंडिनी कलत्रं ॥ पाचिका स्त्री ॥ पाचका दाराः ॥ पाचकं कलत्रं ॥२॥ सुकृतमस्यास्तीति राम १
पुण्यमस्यास्ति ॥ मतुप् ॥ धनं फलं लब्धा धनगणं लब्धे यत् ॥ धन्या धान्या मलकोस्या छनं पुण्यवति त्रिषु इति विश्वमेदिन्यौ त्रीणि
स भाग्यस्य ॥ महानाशयो यस्य ॥ आशयः स्वादभिप्राये मानसाधारयोरपि ॥ इति महाभिलाषस्य ॥ ॥

प्रशस्तं हृदयमस्य ॥ हृदयाद्यालुजन्यतरस्यां ॥ शोभनं हृदयमस्यास्ति भिन्नत्वाविवक्षायां ॥ सुहृदः सहृदय इति वा पाठः ॥ स
ह हृदयेन सहेति विकल्प ब्री(हि) ॥ ॥ प्राणिमात्रस्य ॥ तथात्वात् तत्प्रशास्त्रपरत्वं हृदयग्राहकस्य ॥ ६ शुद्ध मनसः ॥ महानुत्साहो यस्य म
हानुद्यमोस्य ॥ ६ ॥ ६ः साधयति तेपि साधनपरस्परः ॥ ३ ॥ प्रकृष्टा वीरणास्य ॥ यद्वा ॥ वीरणया प्रगायति ॥ घणी प्रतिरीति ॥ ते ॥ वास त्वा
यति णिजंतात् ॥ पचाद्यच् ॥ कर्मणि घञ् वा ॥ नवास्य ॥ जत्पतानामिति तातच्च ॥ नि पूर्वे निपुणाति ॥ पुणा कर्मणि शुभे ॥ इगुपधे
ति कः ॥ अभिजानाति ॥ विजानाति ॥ आतश्चोपसर्गे इति कः ॥ त्यस्मातीत ॥ गत्यर्थे इति क्तः ॥ निरनदीभ्यामिति पत्वं ॥ शिक्षाजात

हृदयालुः सुहृदयो महोत्साहो महोद्यमः ॥ ३ ॥ प्रवीणे निपुणाभिज्ञविज्ञानस्यानशिक्षिताः ॥ वैज्ञानिकः कृ
तमुखः कृती कुशल इत्यपि ॥

स्यतारकादिः ॥ अभि विज्ञ ॥ शिक्षाविद्योपादाने ॥ अकर्मत्वात्कर्तरि कर्मणि वा क्त
॥ विज्ञानं बुद्धिः ॥ विज्ञाने यज्ञं मतुल्ल इति स्कते ॥ विज्ञाज्ञाने नियुक्तः ॥ तत्र नियुक्त इति ठक् ॥ यद्वा विज्ञानेन जयति ॥ तेन
दीव्यतीति वकू ॥ यत्तु विज्ञानं नैपुण्यं तेन व्यवहरति इति दीव्यति ताद्दीनावगानस्यास्मभाणिमुकुटे नातल्ल ॥ उक्तस्म
ते व्यवहरतीत्यस्यानुपादानात् ॥ कविनां तेतिस्त्रैणो पादानेपि विज्ञानस्यानुपादानात् ॥ ब्रीह्यादि ॥ न तिक इत्यपि ॥ कृ
तं मुखमस्य ॥ ॥

अ.टी. सर्वस्य।कृतमुखलादत्त।कृतज्ञः इस्यसंस्कृतपरत्वं॥कर्मक्षेत्रं प्रशस्तमस्य इति॥कुशलः तु जातिक॥सो वृथिव्यांशगन
२ ति॥शल्पचलने॥पचाद्यच्॥रीजर्थे नद्दाणंवा॥कोशलति॥चा भयति॥राजकार्याणि॥पचद्॥कुशाग्ये सदर्थ मो:॥पापा
तरालति॥बुद्धिचैभवात्॥कुशलः॥शिल्पिति त्रिष्वत्तमे वास्तुकृते नापि पर्याप्तो वनपुंसकमितिविश्वमेदिन्यौ॥दक्ष
इज्यते॥इज देवपूजायां॥अचोयत्॥प्रतीक्षते॥ईक्ष दर्शने॥विरहन्तो ऋर्यत्॥इज्यश्च श्रु रखंधवो रितिदेमः॥प्रतीक्ष्य

दृज्यः प्रातिदपः सांशयि[illegible]संशयापन्नमानसः॥दक्षिणीयो दक्षिणार्हः॥
स्तत्र दक्षिण्य इत्यपि॥५॥स्याद्वदान्यः स्थूललक्ष्यो दानशौंडो बहुप्रदे॥ ॥

तिपालेस्यात्॥पुंजेंचेतिमहीति।कडंकर दारस्त्रिरणामो ग्यस्य॥५॥मायाचरखेतिवदर्शि चचेतिक्ष्यतोरक्षिणामर्हीति।अर्हविजा राम
यां।अर्हस्त्यच्।त्री।दक्षिणायोग्यस्य॥५॥मामा चरखेतिवदति।वेदरान्यः वदान्योदानशौंडेस्याद्वाक्रुवादितिवाच्यवत्॥स्थूलं कृ २
टं लक्ष्मस्यस्थू लेभडक्षि जस्यते वा।कर्मणि रूपत।अयकारपावेतु॥यजदाने शौंडः।ससमी शौंडेरितिसमासः॥
शौंडो मत्तोपि विख्यातेइतिविश्वः॥बहु प्रददाति॥प्रदाहृ इतिकः॥चत्वायंतिदानुः॥ ॥

जीवति॥ जीवेरातृकन् वृद्धिश्च॥ जैवातृकः। आयुष्मान् सोमेऽप्युपकाय्युः॥ आयुर्मनोऽस्यास्तीति विग्रहे मतुप्॥ आतिशायने मतुप्

रस्य॥ मतुप्॥ तस्य मत्वर्थ इति भत्वान्न रुत्वं॥ आयुष्मान्॥ अन्तर्वाणिः। अन्तर्मध्ये वाणिरस्य॥ वणिः शब्दे॥ वाणिरिति

त्वं॥ स्त्रियां अन्तर्वाणिः॥ स्त्री॥ वर्णशास्त्रे॥ शास्त्रं वेत्तीति॥ सत्सूद्विषेति क्विप्॥ शास्त्रवित्॥ परीक्षते॥ इक्षदर्शने॥

ण्वुल्। परीक्षकः॥ करोतीति॥ करणं॥ कारणमस्यास्तीति ठक्॥ कारणिकः॥ वरं ददातीति। वरदः। पुनः प्रसन्ने शं तस्मिन्ने च वरदः तु

जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित्॥ परीक्षकः कारणिको वरदस्तु समर्धकः॥

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः॥ दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः॥ ॥

कुमारः काङ्क्षति हे म॥ समर्धयति॥ समर्धकः॥ हृषु तुष्टौ॥ शानच्॥ हर्षमाणः॥ हृष्यति॥ डुकृञ्॥ करणे॥ तात्रो प्रमेति विकुर्वाणः॥ प्रकृतिविकृ

तिं कुर्वन्॥ तल्लादेवादिकला तस्य परिणति सफलीकृतिः। हृष्टमानसः॥ प्राप्ते॥ विकुर्वते॥ वानरः॥ शानच्॥ प्रकृष्टं मनो यस्य॥ हृ

ष्टं मानसमस्य॥ चत्वारि॥ दुःस्थितं मनोऽस्य विगतं विधं वाऽमनोऽस्य॥ अन्तर्मनोऽस्य॥ त्रीणि॥ उत्कण्ठितमनसः॥ उत्कं तं मनोऽस्य

उत्कः। उन्मनाः॥ उत्कं मनस्कं इष्टे रुदिते॥ स्वार्थे कन्॥ उत्कण्ठितमनस्यस्य॥

अ॰ टी॰ दक्षते। दक्ष वृद्धौ॥ शीघ्रार्थे च॥ प्रदक्षिणापायितत्वात् दक्षते इति परस्मैपदप्रयोगस्तु मुकुटश्चिंत्यः॥ दक्षिणो दक्षिणो भूतं

३ सरल छंदवर्तिषु॥ यज्ञादि विधिदाने दिशि स्त्रियां॥ सरति॥ सृ गतौ॥ अत्व ल॥ सरल पूतिकाष्टनाम्नीः सरवचक्रयोस्त्रिषु॥ छ

न्दः ष्टमासमंतात्प्रति॥ आतश्चेति कः॥ उदयति। रूगति प्रापणयोः॥ कर्मणि मज्वा॥ उदारो दातृमहतो दक्षिणेप्य

भिधेयवत्॥ त्रीणि कलाशायस्या॥ स्तु कल्पते॥ कजराष्ट संख्यानयोः॥ इ षण्ड रिखन्॥ शोभना कलायस्मैसेति

दक्षिणे सरलो दारो सुकलो दातृभोक्तरि॥ टी॥ तत्परे प्रसितासक्तविष्टार्थे युक्तउत्सुकः॥

वा॥ शकं। टी॥ तत्परस्तु क्तमं यस्या नित्तत्पर्यंते॥ पृ पालनपूरणयोः॥ क दोमांगासापि॥ पित्तं धने॥ आसंति षज संगे कर्मणि क्तः

त्रीणितात्पर्यम्युक्तस्य॥ इयस्यावर्यश्चि। तत्र युक्तः॥ तत्र यो गं संवति॥ सोति॥ सुतोतिवा। पुत्रसवैश्चर्य योः॥ षु स्व अभिष राम॰

वे॥ वाविसंज्ञापूर्वकत्वात् कुण्॥ भावकि पि आगमशास्त्रस्यानित्यात्तुगभावे वा॥ ततः संज्ञायां कन्॥ यद्वा॥ यत उत्कंति॥ पू ३

र्वं रोमित एव दित्वात् कंचुः॥ नक्षिवितिकिपूताक विके राज इतिरूपस्य॥ दक्षोरस्ताधोधमवतः पचा पिततया पातस्ये के॥

त्यैकमगात्।। अतीयवेत्स्मेतिवा।। राम्ह गतौ।। गत्यर्थत्वात्कर्त्तरिकर्मणिवा क्तः। प्रयतेस्म।। प्रयप्रस्थाने। अकर्मकि
त्वात्क्तः।। अख्यापि—।। ख्याप्रकथने च ख्यातिज ख्यात्याञ्ज्यात्क्तः।। अवेदि। विद्ज्ञाने क्तः।। वित्तोभोगप्रत्ययोरिति निपा
तः।। प्रज्ञापि।। ता अवबोधने क्तः। प्रज्ञ।। विजानाति मतिर्बुद्धी जिक्तः स्मश्राविणोक्तः षट् प्रसिद्धस्य।। (४)।। कृततुन्नख्या
रितं।। लक्षणं तामास्य। लक्षणं नाम्नि चिह्ने चेति विश्वः।। आदृगमनस्य लक्षणं यस्य।। आहतं गुणोतेपि स्यादिति
विश्वः।। हितगुणैः प्रसिद्धस्य।। इभमर्हति।। दंडादित्वाद्यः।। यत्।। एकाभात्।। भ्यसते भ्य सभये।। अन्ये भ्यो धनिती भ्यानुक

प्रतीते प्रथितख्यातवित्तविज्ञानविश्रुताः।। (५)।। गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ।। इभ्य आढ्यो
धनि स्वामी त्वीश्वरः पतिरीशिता।।१०।। रेरा वांसत्न्नकी तरा वितिडेमचं। द्रः आध्यायति। आतइतिकः। पृषोदरादि
:। बहुधनमस्य। इति त्री एणी बहुधनस्य। स्वमस्यास्ति।। स्वामिन्नैश्वर्ये इति साधुः।। स्वामी प्रभुविशेषयोरिति विश्वः। ईष्टे।। ईश्वर
रो भ्रवे।। स्थेशेति वरन्।। ईश्वरो मन्मथे।। शंभौ नाथे स्वामि इति च वाच्यवत्।। ईश्वरी वेश्वरी माया।। इति विश्वमेदिन्यौ। पाति।।
पारक्षणे। पातेर्डतिः।। पातिर्द्विनात्रि छी शे चेति विश्वः।। इष्टे तृन्तृचौ।।१०।। ।।

धि

अ·टी· अभिभवति॥ स्तुवः संज्ञांतरयोरितिकिप्॥ नयति॥ तस्याप्यटो॥ राकुलस्य चो॥ नायको नेता॥ अधिष्ठा इत्यमध्यमणाद्यपी
४ ति विश्वदेवमचंडो॥ प्रभवति॥ विप्रसंभ्यड्वति डुः॥ परिबर्हति॥ दृढ इति वा॥ दृढ दृंहि वृद्धौ॥ प्रभोपरिवृढ इति साधुः॥ अधिप
—— श्चोपसर्ग इति कः॥ भूलविभ्रजादिरिति मुकुटोक्तिश्चिंत्यादद्भ्यो अधिकाऋद्धिरस्य॥ ऋधु वृद्धौ वितिधातुप्रत्ययासे
मुकुटस्य व्यर्थः॥ समृद्धेतिस्म॥ ऋधु वृद्धौ॥ अकर्मकत्वात्क्तः॥ द्वे अतिसंपन्नस्य॥ कुटुंबे॥ घोषणे॥ संसक्तः॥ व्यापृष
तिस्म॥ पृड् व्यायामे कत्वात्क्तः॥ व्यापृतस्तु रुणो विपुवेतिवोपालितः॥११॥ अभ्यागारे तिष्ठति कः॥ आगारांतादन्॥ अभिअ

न्वधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः॥ अधिकर्धिः समृद्धः स्यात्कुटंबव्यापृतस्तु यः॥११॥
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयं॥ वरांगरूपोपेतो यः सिंहसंहननो हि सः॥ १२॥ ॥

धिक अगारिको वा॥ आधान भाधिः॥ उपसर्गे घोः॥ उपगतअत्यादयः॥ इति समासः॥ मत्वप्रधान्॥ कुटुंब मितिविग्रहः राम
॥ उपसर्गेऽधिति किरित्यस्तं मुकुटेन तन्न॥ कर्तरि कि प्रत्ययास्मरणात्॥ उपाधिधर्मी चे विगतां॥ कुटुंबव्यापृते छलेविशेषे ७
रागपुंसिति विश्वमेदिन्यो॥ श्रीणि॥ अंगानि चरूपं च॥ अंगरूपाणि वराणि चतान्यंगरूपाणि नाते रूपेतः॥ सिंहः॥ श्रेष्ठं सं
डननमस्य॥ संहनने तस्सिंहइतिवा॥ राजदंतादिः॥ एकं॥१२॥

निश्चयेन ग्नीयते ॥ वृञ् वरणे ॥ ऋहलोर्ण्यत् । निर्वृषी इति पाठे घञ् ॥ धारणे इति धातुः ॥ व्यसने म्पुदयोः वापिस्य विका
रं सदामनः ॥ तत्तुत्वमिति प्रोक्तं ॥ तस्मिं परा संपतन् ॥ उद्यमं कुर्वन्त्सत्संयुत इति वा पाठः ॥ एकं निःशंककार्यकर्तुः ॥
न वाप्य स्पमतुमिति कायति ॥ आतोनुपसर्गे कः ॥ यन्नु २ स्मृपते बध्यते बाणस्य ॥ मृङ् बंधने ॥ बाऋलकात्त्वतिमबति
म्या मिति ॥ कगीति मुकुटेनोक्तं । तन्न ॥ धातुप्रत्ययानाकारके ङितत्वासं बंधे विधानाभावात् ॥ अवते प्रयोजनाभावा

निधार्यः कार्यकर्त्तय संपतन् सत्वसंपदः ॥ अवाचि मत्कोथ मनोजवसः पितृसंन्निभः ॥ १३ ॥

त् । धातोरित्येकत्वविवक्षणेन धातुसमुदायात्प्रत्ययाभावाच्च ॥ मुकोदेत्पावाग्लीनेपि ताल्वेमः ॥ ईदुतुः सोत्रः ॥ अथम
नोजवः । वेगवत्यस्मिन् ॥ मनसो जवति ॥ प्रविशन्तीत्यजिति मुकुटेनोक्तं ॥ तन्न ॥ उक्तविग्रहात् पितृसंज्ञिनस्यालाभा
त् ॥ अधिकरणविवक्षातु ॥ अचोसंभवात् ॥ अपओचित्यात् ॥ मनोजवपितृसधर्मा इति नाममाला ॥ पितेवमस्य स्निभा
ति ॥ भादसौ ॥ आतश्चोपसर्गे इति कः ॥ स्वामी तु मनोजवसश्च मनसादिव दित्याहुः ॥ पितृसमस्य ॥ १३ ॥

कोकति॥ कुक आदाने। इगुपधेति कः॥ ष्ठीवादयो दिः। महत् कवनं कू। कूङ् शब्दे संपदादि कुवः शब्दस्य कुः भू कौत्रि
भूमिरिति यावत्॥ कु कुं ददाति॥ कू कादायति वा दैप् शोधने॥ आतोनुपेति सुपीति मोक्तिति मा म राम भ्रातरि पुंसि
लक्ष्मीरस्यास्ति मतुप्॥ लक्ष्म्या अच्चेति पामादित्वान्नः। लंच। लक्ष्मणा त्योषधी भेदे सरस्यामपि योषिति॥ राम भ्रात
रि पुंसि स्यात्सश्रीः केचाभिधेयवत्॥ श्रीरस्यास्ति सिध्मादित्वाल्लच्। श्रियं लातिवा॥ कपिलिकादित्वाल्लत्वे श्लीः

स क्षत्वास्तं क्षतां कत्यां योऽदयाति मक्कुदः॥ लक्ष्मीवाल्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्स
ल॥ १३॥ स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः॥

लो पि॥ मनु वपि चत्वारि स्त्रि सति स्म॥
स्नि ह्यि प्रीतौ॥ अकर्मकत्वात् क्तः॥ वात्सल्येति य॥ वातः पुदादित्वेन पात्रे भिलाषोस्यास्ति॥ वत्सांसाभ्यामिति वचू
॥ १३॥ दयते॥ स्पृहि ग्रहीत्यालुच्॥ करुणा शीलमिति ठक्॥ कृपां लाति मितं तघादित्वात् शोभनं रतः शं भुः खि
र जं वायस्य। यद्वा सुरमते॥ सो रमे पूर्वपदस्येति दीर्घः यत्तु तातपलितयं त्रमुरत् ताङ् तिरमेक्त॥ इति दीर्घश्चेति
वचनमुपन्यस्तं मुकुटेन॥ तन्न॥ पंचपादाद्यादौ न लभ्यते॥ चत्वारि॥ ॥

स्व आत्मतंत्रं प्रधानमस्य । अपगतमावृतमावरणमस्य ॥ अपावृतश्चेपदते स्वतंत्रे पि च वाच्यवदिति विश्वमेदिन्यौ ॥ स्वेनेरितुं शीलमस्य ॥ ईरगतौ ॥ सुप्यजातौ णिनिः ॥ स्वादीरेरिणोरिति वृद्धिः ॥ स्वः छंदोऽभिलाषोऽस्य ॥ निर्गतोऽवग्रहान्नियमनात् ॥ निरादय इति समासः ॥ पंच ॥१५॥ परस्तंत्रं प्रधानमस्य ॥ परस्मिन्नधीनः ॥ सप्तमी शौंडैरिति समासः ॥ अषडक्षेति खः ॥ यत्तु परेऽधि अधुपर्यस्येति विगृहीतं ॥ तन्न ॥ शौंडादिष्वधिशब्दपाठस्याप्यभावात् । परः स्वामी अस्यास्ति नाथोऽस्यास्ति ॥ मतुप् ॥ चत्वारि ॥ इनमधिगतः अत्यादय इति समासः ॥ अधिकृतः परिइनोऽस्येति वा । निहन्यते निह-

स्वतंत्रोऽपावृतः स्वैरी स्वच्छंदो निरवग्रहः ॥१५॥ परतंत्रः पराधीनः परवान्नाथवानपि ॥ अधीनो निघ्न आयत्तोऽस्वच्छंदो गृह्यकोऽप्यसौ ॥१६॥ खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः ॥ ॥

न्यते ॥ हंतेर्घश्च ॥ अर्थेकः ॥ आयत्तते स्म ॥ यती प्रयत्ने ॥ कर्मणि क्तः ॥ न स्वच्छंदोऽस्य ॥ गृह्यते ॥ गृह्यको निघ्नके सौके इति विश्वमेदिन्यौ ॥ पंचाधीनमात्रस्य ॥ एके तु नवाधिःपर्यायमाहुः ॥१६॥ खलपू स्थानकल्के पि इति विश्वः ॥ खलं पुनाति ॥ पूञ् पवने क्विप् ॥ बहु करोति स्म एवं संमार्ष्टि किं पत्रक्रतु घञ्विधानमित्यच ॥ स्त्रियां बहुकरा तु विना तद्धात्वर्थविवक्षायां तु टराव स्त्रियं बहुकटेन । तत्र । परापवादत्वेन क्विधानात् ॥ दीर्घसूत्रमाचष्टे ॥ सूत्रं तंतुव्यवस्थयोरिति विश्वः ॥ ॥

अ. टी. दीर्घसूत्रं व्यवस्था यस्य ॥ चिरक्रियायस्य ॥ हे अति विलंबेन क्रिया संपादकस्य ॥ जाल्मयति ॥ जाल्यतेवा जलअपवारणे
६ ॥ बाहुलकान्म ॥ इतिमुकुटस्तु चिंत्य ॥ इतिसुधीतिसूत्रेण तजेरस्य दात ॥ धूमेजु गुरण असंगन्मगीति व कुंठ कुंठल्वा
च ॥ जाल्मस्तु पामरे जुंतौ असमीक्ष्यकारिणि चेतिहैम ॥ असमीक्ष्याविचार्य कर्तुं शीलमस्य ॥ क्षुपीतिणिनिः ॥ हे ॥ कुंठ
ति ॥ गती घाते आलस्ये च ॥ पचाद्यच् ॥ एकं मंदः क्रियास्य ॥ १७ ॥ कर्मसु समर्थः सप्तमी ति योगविभागात्समासः ॥

जाल्मोसमीक्ष्यकारी स्यात्कुंठो मंदः क्रियासु च ॥ १७ ॥ कर्मक्षमो लंकर्मी
णः क्रियावान् कर्मसूद्यतः ॥ स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः १८

पर्याप्ति यो ग्लानाद्यर्थ इतिवा ॥ हे ॥ क्रियाकारणे समर्थस्य ॥ क्रियास्यास्ति ॥ मतुप् ॥ एकं ॥ सकर्म शीलमस्य छत्रादिभ्यो
णो वा ॥ क्रियांकर्मी ॥ हे कर्मसु फलमनपेक्ष्य + कर्मणे क्रियायै अलं समर्थः ॥ अषडक्षेति णितिखः ॥ आसापन्नाल राम
पूर्वे ति परवल्लिंग निषेधात्ताय कास्समासः + कर्मणि शूरः ॥ सप्तमी समासः ॥ कर्मणि घटते ॥ कर्मणि घटोठः नन्नु हे ६
प्रलयेन आरब्धेषु कर्मसमापकस्य ॥ १८ ॥ ॥

कर्मण्यं वेति तनं हुं क्ये ॥ कि पु ॥ कश्चित्कर्मण्यमुणिति पाव ॥ तत्र ॥ कर्मणि साधु तत्र साध्वीति यत् ॥ कर्मण्यं वेतनं ॥ कर्म कि
रोति ॥ कर्मणि भृता वेति ट ॥ हेम स्येनकर्मकं कुर्वति ॥ अयं शब्दो वोक्तो पि भरण्यमुणिति पर्यायांतर कथनार्थमनुदि
तः ॥ कर्म करोति ॥ कर्मण्येण ॥ त क्रिमः ॥ अभ्रत क्रिम इत्यर्थः ॥ यो वेतनं विना कर्म करोति ॥ तस्यैकं ॥ अपह ॰ हं
स्तातः ॥ आद्यो गताद् इति समासः ॥ मतेस्मान ॥ सप्तमीति समासः ॥ द्विमतमुद्दिष्टपस्तातस्य ॥ आमिषमश्नाति ॥ अश
भोजने ॥ सुपीति णिः विं ... शुष्कमांसेपि मांसमात्रेपि साम ता ॥ ताम न्ति ॥ शेषे इत्यण ॥ स्वामुत्त ॥ कल्लरितिपले

कर्मण्ये मुक कर्मचर कर्मकारस्तु तक्रियाः ॥ अपस्नातो मृतस्नानः आमिषाशी तु शौष्कलः ॥ रणी बु
भुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः ॥

गति ॥ तत्र ॥ पृषोदरादिः ॥ संज्ञापूर्वकत्वाद्दृष्य भावोपि ॥ शुष्कलः ॥
शुष्कमांसे वा परिणकेपि शिताशी तिहेमः ॥ द्वे ॥ रणी बुभुक्षा जातस्य ॥ तारकादित्वादित्वादि तच् ॥ .. ध्मतिस्म ॥ अकर्मक
त्वादक्तः ॥ वसति क्षुधोरिति ॥ अक्तु मिच्छुः ॥ अदेः सनि ल्ङ सनो घस्मिसनाशंसेलुः ॥ आशान स्येच्छा ॥ अशनायेति सा
धुः अशनेमा जातास्य ॥ तारकादि ॥ चत्वारि ॥ परस्य त्वं परान्तं नियमस्य ॥ अत्र आदिभ्योच ॥ ॥

अ०टी० ७

पिंडमाजीवनइतिधराणिः॥परस्य पिंडः॥तमसि॥कर्मणिपरए॥ हैपरान्नजीवनस्यभक्षमति॥भक्षअदने॥[illegible]मति॥घ
स्लृअदने॥घसति॥घस्मरादि॥क्मरन्॥अत्ति॥त्रीणि॥२०॥आद्देवीत॥अकर्मत्वात॥क्रदिवोजिगीषायामिति निष्ठान त्वंमस्याबि
भाषेतिनेट॥उदरेष्वस्मित॥उदरह्य॥द्यून॥इतिह्न क्॥ हैआत्मानंकुक्षिंचबिभर्त्ति॥फलेग्रहि रात्मंभ॥भ रिक्षेतिसाधुः॥
वातकुक्षिंभरिः॥ है॥२१॥ सर्वेभामेन्नानिसर्वान्नानिभक्षयती अनुपदसर्वान्नेतिखः सर्वान्नानिभोक्तु॥शीलमस्य॥

परान्नः परपिंडो—भक्षको घस्मरोद्मर॥२०॥आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते॥उभौत्वात्मंभरिः कुक्षिंभरिः [illegible] स्वोदरपूरके॥२१॥सर्वान्नीनस्तु सर्वान्नभोगीजीग धुस्तुगार्धनः॥लुब्धोभिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ॥२२

सुपीतिणिनिः॥ है सर्वबर्णान्निभक्षकस्य॥गर्धनशीलः॥ गृधुअभिकांक्षायां॥त्रसिगृधिति क्नुः॥लुब्धंकाम्येति मुच॥लु
भ्यतिस्म॥लु[illegible]गार्धे॥गत्यर्थेतिक्तः॥लुब्धआकांक्षिणि माधेइतिदेमचंद्रः॥अभिलष्यतिः॥ष लषकांतौ॥लेषपतपदेत्यु
कञ्॥तृष्यति॥ञितृषपिपासायां॥स्वपितृषोर्नजिङ्॥पंचलुलुभस्य॥गा हि तंलुपानि॥लुभगार्द्धे॥लुपसतेदेतिय
ङ्न्तादच्॥[illegible]ति॥लुभगार्द्धेधातोरेकाचइतिपिंडेताद ह्यो हैआतिलुभस्य॥२२॥

उत्कटो मदो रूपमस्य ॥ सोन्मादः इति पाठे ॥ सह उन्मादेन वर्तते ॥ उन्मादनशीलः ॥ मदोद्धते द्वे ॥ अनुकमि । तीक्ष्णश्च रक्त
वित्स्रो न्माद इति पाठे ॥ सह उन्मादेर इत्यपि ॥ तत्र सोपसर्गत्वान्मदेर्घञ् ॥ उन्माद शीलस्य ॥ नयतापि ॥ ज्ञप्राप रोक्तः समु
द्धं तिस्म ॥ समुद्धत् न्यते स्मेति वा ॥ हृं तेर्गत्यर्थकत्वात् कर्तरि क्तः कर्मणि वा क्तः ॥ समुद्धतं समुद्धतं [illegible] वनीतिवत्
च्च वत ॥ हृ ॥ माद्यतिस्म ॥ गत्यर्थे मदेः क्तः ॥ शुण्डायां पानगारे भवः ॥ तत्र भवः इत्यण् ॥ शौण्डो मत्ते चावख्याते ॥ पिप्प
ल्यायां तु भेषजे ॥ स्त्रियामिति विश्वमेदिन्यौ ॥ उत्कटः कटः आवरणमावारको वास्य ॥ यद्वा ॥ उत्कटमदद्वते रु

सोन्माद स्त्वुन्मदिष्णुः स्यादविनीतः समुद्धतः ॥ मत्ते शौण्डोत्कटक्षीबाः कामुके कमितानुकः ॥
॥२३॥ कान्तः कामयिताभीकः कमनः कामनोऽभिकः ॥ छ्याः क्षीबृस्वार्ये संप्रोदश्चेति कः ॥ उत्कटस्त्री
ञमनयोरितिहिम ॥ क्षीबते स्म ॥ क्षान्तौ द मदे ॥ अकर्मकत्वात्कर्तरि क्तः ॥ अनुपसर्गादिति ॥ फुल्लेति साधुः ॥ चत्वारि
कामयते ॥ कमनुकांतौ ॥ अभयच वदे अनुकमनु शिदूः भवितव्यं ॥ अनुकामयते ॥ भिकामयते ॥ अनुकामिकेति साधुः
॥२४॥ न मिकंपीतिरः ॥ अभिकामयते ॥ अनुकामिकेति साधुः ॥ अभिकः कामुके क्रूरे निर्भये [illegible] कथितः ॥ अ
नुरक्ते न स्त्रेति मेच ॥ ॥

अ·टी· कमनः कामुके कामो भिरूपे शोकपाटपे। शिजंता पुच्चू॥ नवविधानुं शाकः॥ अचोयत्॥ ईमिति। गुरगाः॥ विनयंग्राही
८ नुं शीजमस्य॥ स्तुपी तिशि तिः वचनेतिष्टतिस्म। गत्यर्थे तिक्तः॥ तस्तुरुषेकृतास्यनुका आस्र णेति॥ स्ट ग्र स्रवणे।
पचाद्यच्॥ स्ती आश्रयो वचने स्थिते॥ प्रतिज्ञायांच क्ले शे चेतिहेम॥ चत्वारि। प्रकृतिनिष्ठत्वो विधानुं शाकस्य॥२४॥
वशोमधीनत्वं गतः॥ वशं गत इति यत्॥ वक्षमा यत्र तायांस्यादिति विश्वः॥ प्रकर्षे णानेतुं शक्यः॥ अचोयत्॥ हे मितरां प्र
भ्रति॥ भृञ् भरणे क्तः॥ न्मना पिरस्ती स्त्रे विती तस्तु विनी। तस्थ नि भ्रतेति जितें द्रियै॥ वा शि ज्येसाधुवाक्ये स्थितः पस्तु

विधेयो विनयग्राही वचने स्थित आश्रवः॥२४॥ कल्पः प्रयोगे निभृतविनी
तम्रयय यायाताः समा॥ धृष्टेधृष्टस्तु विर्या तस्थप्रगल्भः प्रतिभान्वितेः॥२५॥

क्तस्य॥ धृष्टोतिस्म॥ जिधिषाप्रगल्भे गत्यर्थे तिक्तः॥ धृषित्रासमातोडं भावः धृषे स्थेतिन जिड॥ धृष्टस्तुरितिपाविन्नसिग्ध्वी एम
तिक्तः॥ विरुद्धं मानचेष्टितं यस्य। विरुद्धं मद्यासी दृ॥ गत्यर्थे तिक्तः॥ स्त्री शिनि नल्जस्य। प्रगतो धार्ष्ट्यात्। पचाद्यच्॥ प्रतिभा ८
ते॥ आतश्चेत्यङ्॥ प्रतिभयाऽन्वितः॥ अज्ञानवनवोन्मेषप्रज्ञालिनी प्रतिभा मते॥ रुद्रहृद्भ॥ हे॥२५॥

॥स्था॥ गात्रवेशम ॥ शालनी तकोपीने तिसाधु ॥ द्विसस्तजन्तस्य ॥ विशीर्णशाल न्दामति ॥ नन्द आलोचने ॥ अच् ॥ विस्मये
नाश्चर्ये ऽणान्वितः ॥ पदेवकीयधेधर्मशी लास्ति आसाश्चर्य नधीरोधेर्ये यस्य ॥ इ भत्तरति ॥ अचू ॥ इ षदर्थे चेतिकोः कादेशः ॥ द्वि रोगादिभ्रस्तरणेनाकुलमनसः ॥ त्रस्यति ॥ त्रसी गत्यांतिकुः वि भ्यति ॥ ञिभी भये ॥ भियः क्रुक्लुकनौ ॥ क्रु
क न्लपि भी रुरी त्रैं त्रिलिंगः स्याद्वयो षितिशतिविश्वमेदिन्यो ॥ चत्वारि भयशीलस्य ॥ २६ ॥ आशंसते ॥ आङः शासि इच्छा

स्या दधृष्टे तु शालीनो विलक्षो विस्मयान्विते ॥ अधीरे कातरस्त्रस्नो भीरु भीलुक भीरुकाः ॥ २६ ॥ आशंसुराशंसित
रि गृहयालुर्ग्रहीतरि ॥ श्रद्धालुः श्रद्धयायुक्ते पतयालुस्तु पातुके ॥ २७ ॥ लज्जाशीलोऽपत्रपिष्णुर्वंदारुरभिवादके ॥

र्थां ॥ सनाशंसिभिक्षउः ॥ तन्न ॥ द्वि दधार्थग्रामी ला ग्रहयति ॥ ग्रहस्तदराग ॥ चुरादावयं दं तस्य हिग्रहीत्यालुच् ॥ आया
मं ते लपादेशः ॥ तन्न ॥ द्वि स्तद्राशी लस्य ॥ श्रद्धधाति ॥ स्प हिग्रहीत्यालुच् ॥ एकं पतयति ॥ पतगतौ वा ॥ आलुच् ॥ ल
घ यति तु कन्नः ॥ द्वि पनशीलस्य ॥ २७ ॥ लज्जाशीलमस्य प्रक्षपत्रपने ॥ अञ्जंकः ॥ अतीत्कुशब्दे ॥ वंदते ॥ वदि अभिवादनस्तु
त्योः ॥ श्रुवंदारु ॥ अभिवादयति ॥ लातुल्ल ॥ द्वि वंदनशीलस्य ॥ ॥

अ॰ ल॰ टी॰ ऋणाति॥ऋ हिंसायां॥आरुः हंति लषयते त्पु कत्र॥हि नसि हिं सायां॥न मि कंपी तिर॥हिं स्त्री का कादनी भां स्पो स्त्रियां
र्थ स्या तू घात के न्यवदिति वि॰ ष्वमेदि न्यो॥न्नी णि हिंसा शी लस्य॥वर्ध ते॥वृद्धु वृद्धौ॥कु लं कूजी ती छ्यु च॥अनुर त्त श्चे तिष्यत्
॥वर्द्धन॥वृ धु छेदने॥वर्द्धनी तु ग ल्नं तिकि तिडे मः॥२टी॥उत्पत ति॥प लगतो॥इ ष्लु चा तन्॥छेक्रु द्ध पतन शी लस्य॥
अलं करण शी लः॥अलं कृ जि ति ष्लुच॥मंडन शील॥मडि भूषायां कृधमंडन शीलः॥मडि भूषायां कृधमंडाये ष्य
श्चे ति युच्॥ह्रि अलंकरण शी लस्य॥नवन शी ल॥ग्ला जिस्थ श्च क स्नु॥चाऽ ऽव नु व श्चे ति का च॥ल्लन॥त्री णि न

शराम घति को हिंस्त्रः स्याद्वधि ष्णुश्च वर्द्धनः॥२टी॥उत्पत्ति ष्णु छु ष्णु त्पति॥तालंः करि ष्णु ष्णु मंडनः॥भू
ष्णु र्भ विष्णु र्भ वि ता व र्ति ष्णु व र्ति नः समौ॥२र्थ॥निराक रिष्णुः क्षि प्नुः स्यात्सांद्र स्नि ग्ध स्तु मे दुरः॥

वन शी लस्य व र्तन शी लः॥वृ त्तु वर्त ने॥अलंकृ जिति ष्णु च॥अनुरा ते त श्चे ति पु च॥ह्रि॥२र्थ॥निरा करण शी लः रामु
उ ष्णु च॥मि क्षेपण शी लः॥क्षिप प्रेरणे॥त्रसी ति कुः॥ह्रि निराकरण शी लस्य सां द्रीयन॥स्नि ग्धा॥क्षि क णः॥मिद न शी लः र्थ
॥ञि मिदा स्नेहने॥र्भ जन्मा सतिधुर च व॥जना ति॥तन्॥विद न शी लः॥विदी भि ॰ दा ति कुर च॥

विदुरिछु रिति साधुः॥ त्रीणि ज्ञानशीलस्य॥ विकसति॥ कस गतौ॥ वौक सज्जेति विकासः स्फुटनेव्य क्वाचितिदं त्वांते
धरणी : तस्मादिति बास्थे शमासे विकरन्॥ द्वे विकसनशीलस्य॥ ३ ॥ विसरणशीलः॥ सृ गतौ इणनयती ति क्मरच्॥
क्व स्वस्मितितु कः॥ सृघसी ति क्मरच्॥ प्रसरणशीलः॥ त्रेजयेतिघिनुण्॥ विसरणं घञ्॥ विसारोस्यास्ति॥ इनिः॥ चत्वा
रि॥ सहनशीलः॥ षह मर्षणे॥ अलंकृतितीलत्॥ अन्तुदाते नस्वेतियुच्॥ क्षमणशीलः॥ क्षमुसहने॥ तृन्॥ तृन्नत्भेः

ज्ञातातु विदुरो विंदुर्विकासीतुविकस्वरः॥ ३० ॥ विसृत्वरो विसृमरः प्रसारिचविसारिणि॥ सहिष्णुः सहनः क्षां
तातितिक्षुः क्षमिता क्षमी॥ ३१ ॥ क्रोधनोमर्षणः कोपी चंडस्त्वत्यंतकोपनः॥

क्षमायांपुषिनन्॥ किम्परतिसन्॥ रती
क्षणशीलः॥ सनाशंसभिक्षुः॥ तृन्॥ स्वरती तिघञ्लेइट्॥ शमीत्यष्टाभ्यइतिघीनुण्॥ षट्॥ ३१ ॥ क्रोधनशीलं क्रुधकोपे क्रुध
मंडनीयुच्॥ नमर्षणशीलः॥ युरच्॥ अवश्यं कुप्यतित्यावश्यके तिणिनिः॥ त्रीणि क्रोधनस्य॥ चंडने॥ चडि कोपे॥ पचाद्य
च्॥ चंडस्तुयमलासे॥ तिकोपनेती अविदने॥ नो वेदे त्मविशेषे चन्चंडीतु शिवयोषिती॥ चंडीतुन॥ दशीगांश्वयुग्यरिति
हेमचंद्रः॥ अत्यंतं क्रुध मंडार्थे भ्यस्वेतियुच्॥ हु अतिक्रोधनस्य॥ ॥

अ॰ टी॰ जागरणशीलः जागर्तिनिद्राक्षये। जागरूकः॥ ऊ॥ घूर्णते स्म। घूर्ण भ्रमणे। गत्यर्थेति क्तः। घूर्णं जातमिति वा। तारकादिः। प्र
१० चलइवाचरति॥ कर्त्तुः क्यङ् सलोपश्च। प्रचाल्यते स्म॥ अवलायितास्येति। वा गत्यर्थेति क्तः। द्वे संजातघूर्णस्य॥ ३२॥ स्व
पनशीलः ञि ष्वप् शये। स्वपितृषोर्नजिङ्॥ शीङ् स्वप्ने॥ शीङः श्रद्धालुपू॥ शयालुः स्याद् जगरे निद्राशीलेच॥ कुंज
रे इति विश्वमेदिन्यौ॥ निद्राशीलः द्रा कुत्सायां गतौ॥ स्पृहिगृहीत्यालुच्॥ त्रीणि निद्राशीलस्य। निद्राति स्म। अकर्म

जागरूकोजागरिता घूर्णितः प्रचलायितः॥ ३२॥ स्वप्नक्शयालुर्निद्रालुर्निद्रा
णशयितौ समौ॥ पराङ्मुखः पराचीनः स्याद्वाङप्यधोमुखः॥ ३३॥ देवानंचति
देवद्र्यङ् विश्वद्र्यङ् विश्वगंचति॥ यः सहांचति सध्र्यङ् स स तिर्यङ् यस्तिरोंचति ॥३४॥

कत्वात्कः संयोगादेरिति णः॥ शेते स्म शीङ् पूर्ववत्क्तः॥ निष्ठाशीङिति न कित्वं द्वे निद्राणस्य। परां चन्यभिमुखो भवति।
अंचु गतिपूजयोः॥ ऋत्विगिति क्विन्॥ पराङ्मुखस्य॥ विभाषांचेतिस्वार्थे खः। द्वे विमुखस्य। अवाञ्चत्यधोमुखो भवति॥ संघस्त्र। अ राम
धोमुखं यस्य द्वे॥ ३३॥ विष्वग्देवयोरित्यद्रिः॥ एकं। मूर्द्धन्यमध्यं। यस्तालव्यमध्यश्च॥ एकं। सर्वतो गच्छतः॥ सहस्य सध्रिः स्त्रियां १०
देवद्रीची विश्वद्रीची॥ सध्रीची॥ एकं॥ सह चरत्यस्यातिरस्य स्तर्मलोपे॥ एकं। वक्रंगच्छतः॥ ३४॥ ॥

वदति । वदत्य वक्ता मां वाचि ॥ पचाद्यच् ॥ चर्करीतिद्वित्वा ॥ वदवक्ति ॥ वद भाषणे ॥ तत्र च वक्ता तु पंडिते पि स्याद्वाक्तिन्यप्य
भिधेयवदिति विश्वः ॥ त्री शि ॥ वाचांपतिः द्वे पटुवचनस्य ॥ वाचोयुक्तिकर्तृत्वं ॥ वाग्मरिकृ पपस्य मस्यइत्यलुक् ॥ तत्र ॥ प
टुः ॥ प्रशस्ता वागस्य ॥ वाचो ग्मिनिः ॥ वाग्मी पटौ सुराचार्य इति विश्वमेदिन्यौ ॥ कुचादिकु वाचट कच्छा हृपाव सामर्थ्या
द्वे द्वे रुकः अतिवक्ति साधु कारिणि तृन् ॥ तृला ॥ चत्वारि ॥ जल्पाकवाचां वाचि ॥ जल्पभिक्षेति षाकन् ॥ बवकूत्री

वदो वदावक्ता वागीशो वाक्पतिः समौ ॥ वाचोयुक्तिपटुर्वाग्मी वावदूको तिवक्तरि ॥ १५ ॥ स्याज्जल्पा
कस्तु वाचालो वाचाटो बहुगर्ह्यकौ वाक् ॥ ड मुर्खे मुखराबद्धमुखौ शक्तः प्रियंवदे ॥ १६ ॥ ह्य वागस्य ॥ आ

लाटो बहु भाषिणि स्यात् वामितिवाच्यं ॥ चत्वारि बहुगर्ह्य भाषिणः ॥ ठनिंदितं मुखमस्य ॥ दुर्मुख कपि भिन्नाग भिदोर्नि
मुखरे त्रिषु इति विश्वः ॥ निंदितं मुखमस्य ॥ खमुखेति रः ॥ मुखबद्धेति त्रजत्रणाया वचनपरः ॥ तबद्धं नियमितं मुखम
स्य ॥ त्रीणि प्रियवादिनं शक्नोति ॥ शक्लु शक्तौ ॥ मुशक्यति भ्यः क्तः ॥ प्रियंवदेति प्रियवसे वदः खच् कुर् ॥ १६ ॥ ॥

लोहनं। लुह गार्द्धौ इति वोपदेवः॥ भावे घञ्॥ ८ लोहं लाति॥ आतोनुपेति कः॥ यद्वा रोदमते॥ वाकृलकादू लच्॥ कपिलकादित्वा
ल्लं॥ लोहलः। स्फुटं खलाधारणे व्यक्तावाचि निच् त्रिषु इति विश्वमेदिन्यौ॥ नस्फुटा वागस्य॥ द्वे। गर्ह्यं वदति। सुप्यजाताविति णि
निः। कुत्सितं वदति॥ रथवदयोश्चेति कोऽवत॥ द्वे। कुत्सितो वादोऽस्य॥ कुत्सितं चरति॥ अच्॥ द्वे कुकथनशीलस्य॥ असौम्यो
ऽहृद्यः स्वरो यस्य॥ अप्रशस्तः स्वरो यस्य॥ द्वे काकादिवद्दुष्टस्वरस्य॥ ३७॥ रवणशीलः॥ रु शब्दे। चलनशब्दार्थादि
ति युच्॥ शब्दनशीलः॥ शब्द शब्दक्रियायाम्॥ युच्॥ द्वे शब्दकरणशीलस्य॥ नान्दीवदनशीलः॥ सुपीति वदेर्णिनिः

लोहलः स्यादस्फुटवाक् गर्ह्यवादी तु कद्वदः॥ समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः॥ ३७॥
रवणः शब्दनो नान्दीवादी नान्दीकरः समौ॥ जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते॥ ३८॥

नान्दीं करोति वदति। दिवाविभेति टः॥ आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्तते। देवद्विजनृपादीनां तस्मान्नान्दी
ति कीर्त्यते इति भरतः॥ नाटकाद्यवतौ मंगलार्थं भेर्यादिवादकस्य॥ द्वे। जल घातने॥ पचाद्यच्॥ डलयोरभेदः॥ दृष्टेवासुख
ऽः खं वा न वेत्ति। त्रियो मौ ह्वाल्पदं वशग सम्भवे हि जडसंज्ञकपुरुषः॥ जडा स्त्रियां शूकशिंब्यां हिमग्रस्तमूकाश्च च। त्रिषु
इति विश्वमेदिन्यौ। न जानातीति॥ इगुपधेति कः। द्वे। एडो बधिरः स चासौ मूकश्च पापान्तरेनास्यैड मूकोऽस्मादित्यपर्यगत्य लिङ्गोऽन्ते
मूकः स्यात् छ वे वाक्श्रुतिवर्जित इति रभसः ॥ ३८॥

त्व। ह्री श्री जंयस्य ।। ह्री लि को मत्त्रीपश्च ।। के राइ तिना मलोपसामर्थ्यात् ।। अमथा ह यमेव विद्ध्यात् ।। शीलमेतिव कि ।। अ व्यया
नामितिटि जोपेन सिद्धत्वादि तिमुकुरः ।। तन्न ।। क विधानस्य एकार्थत्वात् ।। न कि उदात्ततिह त्रि स्वरेणमध्येोदात्त ता ग्रसंगात्
।। न हि प्रसंगाच्च ।। हृमो नश्री त्रस्य ।। जं लज्जने स्म ।। त्रोल स्जा व्रीडे ।। अकर्मकत्वात् कः ।। त्र्ये दितश्चेतिनत्वं ।। नग्नोवंदि
त्र्य परा भोः पुंसि त्रिषु विवासमसीति विश्वः ।। न वसो स्यादि गे वंबरमस्य दिगं अस्पाहा परो धनेतमसि शंकरे ।। त्रीणि ।।
निष्कास्यते स्म ।। क समगतो ।। पुरांप्त ।। क्तः ।। अवकृष्यते स्म ।। कृष विलेखने ।। क्तः द्वे ।। अपध्वस्यते स्म ।। ध्वनसु अस्त

त्व ह्री श्री लस्तु त्व ह्री कोनग्नेवास दिगंबर ।। निष्क सिते। वकृष्टे स्यादपध्वस्तस्तु धिक्कृतः ।। ३ एगि ।। त्रात्रगं
धो भिभूत स्वाद्यति साधितः समो ।। वला दिहे निरस्त स्यान्त्र या ।। व ते। निराकृतः ।। १०।।
सनेगतोच ।। क्त

:प रिलक्के वे दितेषव व च्वर्गा तिधिगि निः ।। द्वे ।। ३ एगी त्रातो गवा यस्य ।। त्रात गंधइतिपा गंत रेगंधक धीगंधक त्रामोदि
सं बधे त्रेषगर्व यो रितिविश्व ।। गंधोगर्वे लवेपि चेति त्रिकांडशेष ।। त्र भिभूयतेस्म क्तः द्वे ।। चत्वारः पर्याय इत्येके ।। रुप्य
ते स्म ।। दाश्र्यंतः री यत तिपा वांतरं ।। तन्त्रा दपदानेइति साधुः साध्यते स्म ।। साध्य संसिद्धौ ।। द्वे धनादिक स्य दा दी पी तस्य धनादे
वी ।। प्रत्यादिश्यपतिस्म ।। दिशा अतिसर्जने क्तः ।। निरस्यते स्म ।। त्रसु क्षेपणे क्तः ।। ।।

अ॰ त॰ टी॰ निरस्तः त्वरितसंत्यक्ते त्वरितोदिते निरस्यते प्रतिहते ले चेति हैमः ॥ प्रत्याख्यायते स्म ॥ ख्या प्रकथने ॥ चक्षिङो ख्याञादेशो वा क्तः ॥
१२ निराकारि विप्राकारि कृत्न क्तः चत्वारि ॥ ४० ॥ न्यकारि क्वि ॥ निकृतं विप्रलब्धं स्यात् वञ्चिते विप्रकृते त्रिषु इति विश्वमेदिन्यौ
हैं ॥ विप्रलभ्यते स्म ॥ डुलभष् प्राप्तौ ॥ वंच्यते स्म ॥ क्तः ॥ वंचु गतौ ॥ रूपं तः हैं ॥ मनो हतं यस्य प्रतिहन्यते स्म क्तः ॥ भवेत्प्रति
हतं दृष्टमतिस्खलिते रुद्धयोः ॥ प्रतिबध्यते स्म ॥ बंध बंधने ॥ क्तः ॥ हन्यते स्म क्तः चत्वारि कृतमनोभंगस्य ॥ ४१ ॥ अधिक्षि
प्यते स्म ॥ क्षिप प्रेरणे ॥ क्तः ॥ अतिहतः प्रतिहते कुत्सिते विश्वः ॥ हेमचंद्रौ ॥ प्रतिक्षिप्तं संचारिते स्यात्प्रेषिते पंच कत्रिषु

निःकृतः स्याद्विप्रकृतो विप्रलब्धस्तु वंचितः ॥ मनोहतः प्रतिहतः प्रतिबंधो हतश्च सः ॥ ४१ ॥ अ
धिक्षिप्तः प्रतिक्षिप्तो बंधे कीलितसंयतौ ॥ आपन्न आपत्प्राप्तः स्यात्कांदिशीको भयद्रुतः ॥ ४२

छिकृतात्तेपस्य बध्यते स्म ॥ कील बंधे क्तः ॥ संयम्यते स्म ॥ क्तः ॥ त्रीणि ॥ आपद्यते स्म ॥ पद गतौ ॥ क्तः ॥ आपन्नः सापदि प्राप्ते
पि वाच्यलिंगकः ॥ कापदं प्राप्तः ॥ कांदिशीको दिशं यामि त्याः ॥ डु ॥ नरा हेति मासारादिभ्य इति ठक् ॥ पृषोदरादिः ॥ मकुकुटस्तु
कदि वैक्लव्यो भावे घञ् तातमत्वर्थीयेति कंदी ॥ स्त्री कुसे चने ॥ भावे घञ् ॥ स्त्री कः द्वारगार्थत्वादस्कपातेवत्तेति ॥ वैक्लव्यमु राम
को स्कपातः ॥ कंदिशीकः ॥ तद्योगाज्योत्स्नादिभ्य इत्याः ॥ अद्रुव ॥ द्रु गतौ ॥ कर्तरि क्तः ॥ भयाद्रुतः ॥ पंचमीति योगविभागात्स १२
मासः ॥ ४२ ॥

न्याय्यते स्म॥ आचान्तोमि त्रुनं प्रत्याक्तौ शोजातो स्येतिवाइतर॥ चलरसंचलने॥ रपंत॥ क्तः॥ चालितः आविते द्वारिरमी वार्त्ती
स्लिं पि चन्त्रिष्णु॥ अभिरास्यते स्म॥ रास्तु डिं मायां क्तः मस्यविभाषेति नेट्॥ धापि त्रारा॥ इति वा॥ त्रि शा युनमि त्तं मि थ्याहृ
भृतस्य॥ संक्रमति॥ क्रमगतौ॥ समिकस ठ त्क त नस्थिरः॥ हि चलस्वभावस्य॥ व्यसनेनार्त्तः॥ उपरज्यते स्म रंजुरणे क्तः उपर
क्तो व्यसनार्त्तो राकुर्यग्र स्तेंऽस्मृर्य मो रिति विश्वः॥ हि देवे मानुष पीडायुक्तस्य॥ विन्ति मोहस्तोस्य॥ विहस्तु स्तु विकलेपं॥ एके
स्या चारितः चारिति भिन्न स्लेसं कस्तुकोऽस्थिरे॥ व्यसनार्त्तौ परक्तौ द्वे विहस्तव्याकुलौ समौ॥ ४३॥ विक्लवे विकलः
स्या तु विवशोऽरिष्टदुष्टधीः॥ कश्यः कशार्हे सन्नद्धे त्वाततायी वधोद्यते॥ ४४॥
ऽकरेऽइतिहेमः व्याकोजतिकुलसंस्त्या
ने॥ बंधुश्च॥ इगुपधेति कः॥ द्वे शोकादिभिरिति कर्तव्यतामूढस्य॥ ४३॥ विक्लवते॥ क्लङ् गतौ॥ अच्॥ विकलति कल संचल
ने स्म च॥ द्वे स्वांग॥ न्येव धारयितुमशक्तस्य॥ विहृद्धं वष्टि वशकांतौ॥ अच्च॥ विवशा स्त्री॥ की वस्यात्मा रिष्टदुष्ट विमोगयो
अरिष्टेन दुष्टा अरिष्टदुष्टा धीर्यस्य द्वे॥ आसन्नमरणा सन्निं तल स्नेशेन दूषितमतेः॥ कशामर्हति॥ दंडादिभ्यो यः॥
वर्ष्पंकषहे मघयोः अश्वमेधेऽपीति हेमः॥ कशामर्हतीत्यर्हइत्यच् द्वे ताडनार्हस्य॥ सन्नह्यते स्म॥ नह बंधने अकर्म
कत्वात् क्तः॥ भाव क्तां तादर्वा घनवा॥ आततं यथा पितुं शीलमस्य॥ अयगतौ स्तुपातिणिनिः राकं॥ ४४॥ ॥

अ॰ त्व॰ टी॰ द्वेष्टमर्हति ॥ षि॰ धिब्लघ्नीतो ॥ ५१ ॥ अक्तिदः तमर्हति ॥ शीर्षच्छेदाद्यच्च ॥ छेदं शिरश्छेदार्हस्य विशेषणाबध्यः ॥ तौ बयो धर्मे
१३ तिपक्ष ॥ एके मुशलेनबध्यः ॥ दंडादिभ्यो यः ॥ राकं ॥ ६४ ॥ अकलंस्तु कैकमास्य ॥ शिश्विदे श्विदिश्रैन्ये ॥ लव ॥ कानन्त्वं
नित्यल्लनुम् ॥ कश्लकर्मेति पावांतरं तन्त्र ॥ विताकरौ धातुः ॥ श्वेतिलुमिछ तिश्वितेदं श्वेत्या तच्चदत्वं ॥ सन्नोल्कुक
॥ छ अपापकर्मणः ॥ पापकर्मणि वा ॥ चपचिः त्रिः चपस्वालने ॥ कृष्णा ॥ छदि त्वात्कलच्च ॥ चपलश्चो केवले ॥ क्षणिके
चिकुरेशी प्रेपरदेश्रसोस्तां तरे ॥ मीनेमि चपला तुस्या मिष्पल्लां विद्यु तिश्वियां ॥ पुंश्च त्यामपीति देमनविति श्र्यंकु

द्वेष्ये त्वश्चिगतो बध्यः श्री षच्छि वद्रमौ समौ ॥ विष्पो विशेषणायो बधो - - - मुशलेनयः ॥ ६४ ॥
शिश्विदानो कस्यकर्म चिचपलश्चिकुरः समौ ॥ दो षौ ॥ कटकपुरोभागाति कतस्त्वनुज्जुः शठः ॥ ६६ ॥

रमिनि ॥ कुरच्छदे ॥ इगुपधेतिकः ॥ चिकुरो ... के शेचंचलशैलमोः ... नस्ति ... पि इतिलेमः ॥ द्वेदो
षमनिश्चि ... ॥ हीकराक ... नदक ज्ञानयस्य कुरः पूरं वं भजते ॥ भजसेवायां ॥ संपु चेति घितु १३
णः ॥ छदो षे कस्याहकस्य निकृतनि ॥ कृती छेदने ॥ इगुपधेतिकः ॥ निकृतं विप्रलब्धे स्यात्कठे विप्रकृते त्रिषु ॥ कृजु विकट
॥ नजि ॥ तितत्पुरुषः ॥ नलोपोनञः ॥ शाठ्ये के तवे ॥ पचाद्यच्च ॥ शाठ्यो मध्यस्थपुरुषध त्तूरके पिचेति देमचंद्रः त्री ॥ शिवक्काश

कर्णेजपति । जप व्यक्तायां वाचि ॥ सूलं बकरणयोरित्यच् ॥ दुलदं त्यादि त्प लुक ॥ सूचयति ॥ सूचेः पे ण्वेदं त्यादि दंतः ॥
मि
रवुल् ॥ सूचकः ॥ दुर्जने कथके सीवनद्व्यमाजीरि वायसे पिचेति हेमः ॥ दे विंशति पिश अवयवे व्रश्चि पिशि
धिपि शिमि
यि स्पः ॥ कि दित्सु तनु ॥ बाकुलकात् नानति मुकुटो क्तिस्वेतस्य त्रासमरणम् लिको पि ॥ सुसंकं कुमे पिच । कपि
चक्के च काकेना सूचेक क्रूरयोस्त्रिषु ॥ द्विधा मांपि शुनारस्त्री स्यादिति विश्वमेदिन्यौ ॥ दुष्टो जनः कुमतीति समासः
रवं छिद्रं लाति वा । खलसंचयं ॥ अच् ॥ खलः कल्के भुवि स्थाने क्रूरे कर्णेजपे धमे इति हेममेदिन्यौ ॥ त्रीणि

कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलः ॥

परस्परं भेदकस्य ॥ स्वामी तु सूचकपर्याये ण्वेनाह ॥ नृशंस मति ॥ शसु हिंसायां कर्मण्यण् ॥ अजर्तश्च निमुकु
तो नृशंसः समस्यकः । अजपवादस्य रणेजागरुकत्वात् ॥ दुननशील ॥ लज्जृ मते त्युकञ्च ॥ छ्तति । कृती छेदने क्त
स्य क्रू चेति रक् ॥ अतयोधातोः क्रू आदेशश्च । पलुमु कुटे नष्ट गतीति विग्रहे ब्रह्कृते रादयश्चेति रक ॥ क्रू आ

अ.टी.
२७

परस्पराविरुधं च॥ दूरादूयश्चेति॥ नृशंसं चनास्ति क्रूरः नृकवि नेघोरे नृशंसे यनिधे यवदिति विश्वः॥ पापमस्यास्ति अशी
रआद्यच्॥ चत्वारि परद्रोहकारिणः॥ धूर्वति॥ धूर्वे हिंसायां॥ हं मिमृग्णाति तत्॥ राह्लोपः॥ धूर्त्ते तु खंडजवरो
धूर्त्तो धूर्त्ते रमाविनो रिति हेमचंद्रः॥ वंचयति॥ वञ्चु गतौ॥ एपं तः॥ रम्बुलः॥ वंचकस्तु खले धूर्त्ते गृद्ध बष्टौ वजं बुकेइ
ति विश्वमेदिन्यौ॥ द्वे परप्रतारकस्वभावस्य॥ ४७॥ न जानाति॥ इग्नुपधेति कः॥ अज्ञश्च जडे मूर्खयो रिति विश्व

नृशंसो घातुकः क्रूरः पापो धूर्त्तस्तु वंचकः [illegible] मूर्खवैधेय्यबालिशाः॥ ॥

[illegible] ॥ गत्यर्थेति क्तः॥ मूढस्तु नं त्रिनिजन्ते [illegible] विश्वः॥ जातं जन्मकालमनतिक्रम्य वर्त्तते॥ य
[illegible] तिष्ठभावयीभावः॥ तदस्यास्ति॥ अर्श [illegible] ति॥ मूढे रवौ मूर्खे विधिर्न विधानं॥ [illegible] ॥ अ
विद्या॥ वहि [illegible] रां॥ [illegible] मित्यपरपबलो शाम्यमसे [illegible] मूर्खत्वादहुज्यन्वात्र॥ वालिशस्तु शि
शौ मूढ मूर्खे [illegible] स्वामी [illegible] कु गतिसमासः॥ कोकनूतत्पररूपरूपे॥ ॥

राम
२७

रूपांकरोति॥ तत्करोतीति॥ [illegible] ॥ [illegible] रति[illegible] ॥ स्फुट॥ अतादेरास्यस्थानिवद्भावात्पुरुषः॥ यह
कपतो रूपाविषयीक्रियते॥ [illegible] ॥ [illegible]कात्॥ स्फुटिवासंज्ञापूर्वकत्वाद्गुणाभावात्॥ [illegible]काह्नत्वाभा
य[illegible]॥ कृपायांगतावित्यस्य [illegible]कासंप्रसारणं॥ यह॥ क्रयेत्यत्रमतांतरेकृपेतिपाठः॥ तेनरएवक्रूपपक्षः
कृपायामितिवोपदेव॥ ततोबाह्यलकात्॥ स्तुवंदनति॥ स्तुदिसंपेषणेस्फायितंचीतिरक्॥ स्तुवोदरि[illegible]कप

कदर्येकिंपराग्॥ स्तुद्रकिं॥ पचात्मितंपचा॥ ६८॥

रो॥ विकृटे॥ प्यन्तरांसयो॥ स्तुत्राव्याघ्रीनदीव्यंगावहती॥ सरयास्तुच॥ चांगेषिकायांपश्चिमात्रवेरूपयोरितिक्षमचं
द्र॥ किंपचति॥ ताछील्येतिवानुराराग्नत्वा॥ ल्क्षतित्यमागमश्रासनमितिनस्तु क॥ किंस्तेपद्धतिसमास॥ मितंपचति॥
मितनखेचेतिमवच॥ यह॥ किंपच॥ अतमितंपचइतिछेद॥ पचाद्यच॥ तमितंपच॥ तज्ञित्वानमितंपंच॥ ६८॥

अ.टी.
२५

निर्गतं स्वमस्य॥ स्वान्तिक्रांतो वा॥ ह्रस्वाविधाप्रकारःसमृद्धिं वी। स्यांऽविधोवाच्यलिंगः स्याऽर्गते पि॥ खलेपि
चरीयतेस्म गत्यर्थेति क्तः॥ पंच वननं॥ वनयाचते॥ सार्वधातुष्वपइन्॥ वनिविछति॥ सुपआत्मनः॥ क्यच्॥ रकुलुक्वनी
पक इति पाठे वनीपानिकः॥ ततः संज्ञायांकन्॥ कुत्वा। मृलुकुकुदे नवनतीति दिगण्यवनियां ण्वेत्सुक्तं॥ तद्विंभयया
चकइत्यापन्ते॥ यावति॥ दुयाचृं यां ण्वायां ल्सु॥ स्वान्तेषणो॥ बकूलमत्यत्रापीति यच्॥ याबति॥ रकुलु॥ अर्थी

॥निःस्वस्तु ऽविधो दरिद्रो नो ऽर्गतोपिसः॥ वनीपको याचनको मार्गणो याचकार्थिनो॥४१॥ अ
हंकारवान्नहंयुः स्याछुभंयुस्तु शुभान्वितः॥

स्यात्ति। अर्थश्चासन्निदितरतिति। अर्थयते॥ अर्थया
चने॥ न्यादिणि निर्वाल्प्रा वन्पकेणिनिवा पंच॥४२॥ अहं कारोस्यास्ति मनुप्॥ अहमस्यास्ति॥ अहं शुभ राम
मितिमांतमव्ययं॥ अहं शुभमोर्पस्र॥ इमावं कारस्य शुभमस्यास्ति॥ युस्र॥ शुभेनान्वितः॥ कर्तृ करणइति समासः १५
॥३॥ दिविभ्वाप्नुआगयामिति यत्र॥ उपपद्यंते॥ पदगतौ लपपत्। पदेतुक ज्ञ। तिष्ठते च नारक व्याहृत्ये दिविपदं॥ ॥

मातापित्रादिदृष्टकारणनिरपेक्षा॥ अदृष्टसहकृतेभ्योऽणुभ्यो जाताः परे वास्ते हि द्विधोपपादुक उच्यंते॥ एकं नाचनौ स्वाघो
मेषां॥ आदिशब्देन खरगश्वादीनां ग्रहणं॥ जरायोगर्भाशयाज्जाताः पंचम्यामिति जनेर्डः॥५०॥ स्वेदजनकत्वात् स्वेदः॥
स्वेदाज्जाताः उक्तिमिश्च दंशश्च॥ शब्देन मशकमत्कुणादि ग्रहणं॥ एकं॥ पक्षी च सर्पादिश्चेषां॥ आदिशब्देन नक्रमत्स्या
पिपीलिकादिग्रहः॥ सप्तम्यां जनेरिति डः॥ एकं प्राणिवर्गः॥ तरुश्च गुल्मश्चाद्यौ येषां॥ आद्यशब्देन दूर्वौषधिलतादिग्रहः

॥द्विजोथ पोतको देवान्नगवाद्या जरायुजा॥५०॥ स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः॥ उद्भिदस्तरु
गुल्माद्या उद्भिदुद्भिजमुद्भिदं॥५१॥

भुवमुद्भिदं तिभिद्धिरविदारणे॥ सस्थितिक्विप्॥ उद्भिद उच्यते॥ उद्भित्पा
र्थियानाद्॥ उद्भिदुक्त उद्भेदनमुद्भित्॥ संपदादिभ्यः क्विप्॥ उद्भिदो जातं॥ पंचम्यामिति डः॥ उद्भिन्नत्त्वि॥ इगुपधं
तिकः॥ त्रीणि॥५१॥ सुद्धिमते॥ दुडूनादरे॥ गल्हेहि त्यक्॥ पृषोदरादिः॥ मह॥ सुडन त्रि वित्तं च विकरोति॥ उंदी क्लेदने॥ बा
हुलकादर॥ शंकश्चादिः स्त्रीयां गोरादिस्वात् डीपू रोचते॥ ठचरीसो॥ चरंते॥ चरणातो॥ दसनिजंतीतिमरस्र॥ ॥

चारुवहस्पतो॰पुंसि शोभनेत्वभिधेयवदितिविश्वः॥सुशोभतेसमंसर्वमस्य॥सुविनिर्दिभ्यइतिषत्वं॥साध्रोत्यर्थं॥पायसंसिधौकृ
वपिसुराप॥साधुर्जभेमुनौवार्धुसिके सज्जनरस्ययोरितिहेमचंद्रः॥शोभतेसुभरीसो॥अनुदात्तेतश्चेतिमुच्॥शोभनोयोगभेदे
ना॥सुंदरंवाच्यलिंगकः॥ कम्पतेस्म॥कमुकान्तौ॥क्तः॥यस्यविभाषेतिनेट्॥अनुनासिकस्येतिदीर्घः॥यद्वा॥कनतिस्म॥कनिदीप्त्या
दौ गत्यर्थेतिक्तः॥८ कांतास्याच्चप्रियागौस्त्रीशोभनेविधुनाधवे॥लोहेचंद्रसूर्यायपथ्याम॥तुशिजाक्रतेतिविश्वमेदिन्यो॥मनो

सुंदरंरुचिरंचारुसुखमंसाधुशोभनं॥कांतंमनोरमंरुच्यंमनोज्ञंमंजुमंजुलं॥ ५२॥

रमयति॥रमुक्रीडायां॥रम्यंतः॥कर्मण्यपरप॥मनोहरति॥हरतेरनुद्यमनुइत्यच्॥रोचनेरुच्यतेवा॥राजसूयेति
साधुः॥ मनसाजानाति॥इगुपधेतिकः॥निवृत्तप्रेषणोन्नजानाति॥मूलविभुजादित्वात्कइतिमुकुटः॥तन्न॥
तस्यापिकर्तरिविहितत्वेनज्ञायतइतिविग्रहप्रदर्शनस्यविरुद्धत्वात्॥यद्यपिसुपसुपेतिसमासः इतितत्पुरुष
विधायकस्यसत्वात्॥सज्यते॥धनौइतिसोः आश्रोत्रः॥बाहुलकात्ः मंजुमंजुलानि॥ज्ञातोनुपेतिकः॥मंजुलंच
जलांतरे॥दमेकुंजेमंजुलस्तुमलुहेमइतिहेमः द्वादश॥५२॥ ॥

नन्दिन्मते मनोऽत्र ॥ पिचण्डस्तरणी ॥ करोतीति ल्युट् ॥ संज्ञायां कन् ॥ दीर्घादिपाठे आड् बोध्य ॥ राकं ॥ अभितइष्यतिस्म ॥ इष्ठुरच्छ
यां ॥ क्तः ॥ अभिवीक्षाभिमुख्ययोरिति विश्वः ॥ अभ्यामुमिष्यतेस्म ॥ आहुव्याप्तौ ॥ मनंतः ॥ आप ॥ इष्टधामीत् ॥ क्तः ॥ हृदमस्य
प्रियमितियत् ॥ हृदयस्य हृल्लेखेति हृदादेशः ॥ हृद्यं धवली जीरे च हृ १८ त्रिये इष्टवे पिच ॥ वशाकृच्छे मत्रे च कद्योरुच्या
रव्य भेषजे इति विश्व ॥ श्रीणाति ॥ श्री अतर्पणे ॥ इगुपधेतिकः ॥ प्रियोहृद्योपधेरुद्यधवेश्वतिहेमः पट् ॥ ५३ ॥ निकृष्यते

तल्लसेचनकं तृप्तेर्नास्त्यंतो यस्य दर्शनात् ॥ अभीष्टेभीप्सितं हृद्यं दयितं वल्लभं प्रियं ॥ ५३ ॥ निकृष्टप्रतिकृष्टार्वरे
फयाप्याव माध्धमा ॥

स्म ॥ कृषविलेखने क्तः ॥ कृष्टाति ॥ कृष्टते ॥ अन्येभ्योपीति वनिप् ॥ यथ ॥ कृष्टते ॥ अवद्याचम
नाधमार्वरेफाः कुत्सितेइतिवर्क्ततो निपातः ॥ अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिंगकः ॥ रिफति रिफकत्थनयुद्धनिंदाहिं
सादानेषु ॥ अपकर्तरि चेति घञ् रेफोरवर्णः पुंसि स्यात् कुत्सिते वाच्यवत् पुनरिति विश्वः ॥ रिफ्यते ॥ अवपधाधमे तिष्ठत्र
त्पयां तोनिपातः ॥ ॥

अ॰त॰टी॰ ११ रेफइति पाठे रीः ॥ तिरेभराणयो ॥ वा क्कनका तृपः ॥ रेफः स्मात्रिदिवे क्रूरे इति विश्वः ॥ याप्यते स्माप्राप्यरोरण्पंतः ॥ अचो
यत् ॥ माः प्यंतु पायनी मेस्मान्निति ते प्यभिधेयवत् ॥ अवतस्माद् गत्मनं ॥ अवरत्तरणादे अवये तिस्र त्रेराणम प्रत्यया
नो निपातः ॥ तत्रैव कारस्य पत्ते धकारः स्मधयमः स्यात् हृ जने इति विश्वः ॥ कुत्सितं पूयते ॥ पूज यविसरणे ॥ अ
च् ॥ पृषोदरादित्वादत्वे के पूयइत्य पि ॥ कुत्सा संजानास्य ॥ तारकादि ॥ नञ् द्यते अवद्यानमेति निपातः ॥ खेटति ॥ खि

कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥५४॥ मलिमसं तु मलिनं कच्चरं मलदूषितं ॥

ट त्रासते । अच् ॥ खेटः कफे ग्राम भेदे चर्म एपत्लवति त्रिषु ॥ गर्ह्यते ॥ गर्ह कुत्सायां ऋहलोर्ण्यत् ॥ अणति ॥ अ
ण् ॥ अच् । कुत्सायां कन् । त्रमोदरा ॥ ५४ ॥ मलो स्यास्ति ॥ ज्योत्स्नातमिस्त्रेतिसाधु ॥ मलीनसं तु मलिने कृष्णकाशी
सलोदयोरिति विश्वमे दिन्यो ॥ रतिवर्से तेधत्तूरिसलिलेक्क लदोवा ॥ मलिनी रजस्वलायां चेति हेम ॥ कुत्सितंच
रति ॥ अच् ॥ रयवदयोरैक्येतिष्ठ चकारात् को कत् ॥ मलेनदूषितं ॥ कर्तृकरणे इति समासः ॥ ध्वलारि ॥ । राम २७

पूयते स्म ॥ पूङ् पवने ॥ पूञ् पवने क्तः ॥ पूतं त्रिषु पवित्रे च वराटिके बकुलीकृते ॥ पुनाति ॥ कर्तरि चर्षिदेवतयोरिति इत्रः ॥ पवित्रं तु
मेध्ये ताम्रे कुशे जले ॥ अर्घोपकरणे चापि पवित्रा तु नदी भिदि इति हैमः ॥ मेघनादोंसे ॥ तु संगमे च गपतू ॥ पवित्रं प्रयतः
पूतः इति त्रीणि विषमठकं ॥ इदं त्वशाणि विषमठकं ॥ इदं त्वशाणीति ॥ त्रीणि ॥ भवि श्रोति ॥ ईंधी दीमो ॥ वा विधेरिसि
कत्वे ॥ इधेरिणिति मुकुटस्तु चिंत्यः ॥ विमल आत्मस्वभावो यस्य ॥ स्वभावनिर्मलस्य ॥ ५५ ॥ निर्णिज्यते स्म णिजिर् शौचे पोष
णयोः क्तः ॥ शोध्यते स्म ॥ शुध शुद्धौ ॥ ण्यंतः क्तः ॥ मृज्यते स्म ॥ मृजू शुद्धौ ॥ निष्क्रांतं शोध्यमस्मात् ॥ शोध्यान्निष्क्रांतमिति

पूतं पवित्रं मेध्यं च वीध्रं तु विमलार्थकं ॥ ५५ ॥ निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करं ॥ असारं फल्गुशू
न्यं तु वशिकं तुच्छरिक्तके ॥ ५६ ॥

वा तावस्करो ऽक्तः फल्गु इति ॥ पंचातनी तमस्य ॥ न सारोऽत्र फलति ॥ त्रि फल्गा विशरणे
फलि पाटि साधु ॥ फल्गुः कोको ऽबरिके वृक्षे निरर्थकेपि चेति हैमः ॥ फल्गुसारे भिधेयवत् ॥ नदी भेदेन मजयांस्त्री ॥ तिश्विश्व
॥ धि शुने हितं ॥ शुनः संप्रसारणं वा ॥ दीर्घ इति यत् ॥ शून्यं विडु च तिजु नोऽस्त्र न्यालु नलिकाद्यमि हैमः ॥ ठश्च रपते ॥ वश कांतौ
॥ सर्वधातुभ्य इन् ॥ संज्ञायां कन् ॥ तोदनं ॥ संपदादित्वात् ॥ श्रावेऽक्ति क्विप् ॥ तुदव्यथायां छ्यति ॥ छो छेदने ॥ मूलविभुजादित्वात् कः ॥ ॥

उरं छातिवा ॥ आतोनुपेतिकः ॥ रिच्यतेस्म ॥ रिचविवियोजनसंपर्चनयोः ॥ कः स्वार्थेकन् ॥ चत्वारि ॥ ५६ ॥ प्रदाथातिस्फुट स्तुत्वा
प्रधानंस्यात्मात्ले प्रकृतौपरमात्मनि ॥ प्रज्ञायामपिच क्लीबमेकत्वेतत्रमेसदृ ॥ प्रकृष्टंमुखंप्रथमैमुख्येइतिरेमः ॥ प्रवि
च्यते ॥ विचिरपृथग्भावे ॥ घञ् ॥ नोतमोस्मात् ॥ अतिशयेनोत्कृष्टः ॥ उत्कृष्टार्थइत्वेंरुछहात् ॥ तमम्भूप्रव्यकर्षर्थेत्वान्त
रामरष्ठ तास्पति ॥ नमुकांस्तायां ॥ अच् ॥ मुखमिवामुखेभवोवाशाखादित्वाद्यः ॥ वर्यनि ॥ वरईप्सायां ॥ चुरादावदंतः

क्लीबे प्रधानप्रमुखप्रवेकानुत्तमोत्तमः ॥ मुख्यवर्यवरेण्यश्च प्रवर्हंतिवरार्ध्यवत् ॥ ५७ ॥ पराद्ध्याग्रप्राग्रहर
प्राग्र्याग्र्यिमथाग्रियं ॥

अचोयत् ॥ वीयते ॥ वृञ्वरेणे ॥ वृञ्भूराधरोपः ॥ प्रवर्हति ॥ वर्हिद्वधौ ॥ अच् ॥ अवरास्मिनर्थेभव
ः अर्धाधद्यत् पराकराधमोत्तमपूर्वाद्य ॥ न अवराद्यः ॥ नञितिसमास ॥ ५७ ॥ परस्मिन्नर्द्धे भवः यत् ॥ अगति ॥ अगकुटिलायांग
तौ ॥ रुजेंद्धेतिसाधु ॥ अग्रंपुरस्तात्परिमाणेवलस्यच ॥ आलंबनेसमूहे वप्रांतेचस्यान्नपुंसकं ॥ अधिकेचप्रधानेचप्र
थमेचाभिधेयवत् ॥ प्रकृष्टमग्रं ॥ आग्रंहरति ॥ हरतिरनुद्यतेच ॥ आग्रेभवः ॥ अग्रेभवः ॥ अत्राद्यत्वछोच ॥ समसदत्राः ॥ ॥

अतिशयेन प्रशस्तः ॥ अतिशयेन तमविष्ठनौ ॥ द्विवचनविभज्योपपदे तरबीयसुनौ ॥ अजादी गुणवचनादेव ॥ प्रशस्यस्य
श्रः ॥ श्रेयस्कोऽस्तु मे धर्मः ॥ इति श्रेयांस्तु वाच्यवत् ॥ श्रेयसी करिपिप्पल्यामभयापाठयोरपीति विश्वमेदिन्यौ ॥ श्रेयान्करे
कुबेरे चेति हेमः ॥ पुष्णाति ॥ पुष्यपुष्टौ ॥ पुषः कित् ॥ कलं पुष्कलेति कलन् ॥ पुष्यत्यसौ कित् ॥ कपिरिकादिरिति मुकुटः ॥
तच्चिन्त्यं ॥ तादृशपाठाभावात् ॥ पुष्कलस्तूत्तमे त्वाच्च ॥ पुष्कलस्तु पूर्णे श्रेष्ठे इति हैमः ॥ अतिशयेन सत् ॥ तमप् ॥ सत्तमः
स्यात्पूज्यतमे साधीयस्तूत्तमे त्रिषु ॥ अतिशयेन शोभन ॥ पंच ॥ वर्ष श्रेयसि तु त्तमं प्रगुणं चेति नाममालायां

श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥५७॥ स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः ॥ सिंह
शार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥५८॥ अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ॥

अग्रतरं श्रेष्ठं मुख्यं ॥ वर्षमबर्हणमिति त्रिकांडशेषे च ॥ श्रेष्ठस्य पादादेकविंशतिरेव शोभनस्येत्यन्ये ॥ ५८ ॥ पुमांश्चा
सौ गोश्च ॥ गोरतद्धितलुकीति टच् ॥ श्रेष्ठस्यार्थः ॥ श्रेष्ठार्थो गोचरो येषां ते क्वचित वाचकांड ति पाठः ॥ एकं ॥ ५८ ॥ अग्रमा
श्रितं ॥ प्रधानादन्यत् ॥ उपसृज्यते ॥ सृज विसर्गे कर्मणि घञ् ॥ त्रीणि विसृतार्थ रेते विशेषह ते ॥ वेः शालच्छंकटचौ विशालं वि
शंकटं ... नपरस्त्वभिधेयपुंसि ... ध्वजे त्वभिधेयवदिति विश्वमेदिन्यौ ॥ ॥

अ॰टी॰ प्रथ्यते ॥ प्रथ प्रख्याने ॥ प्रथिम्रदीति कुः ॥ संप्रसारणं च ॥ पृथुर्विशाले स्त्रूपाले वाप्पि काकस्जजीरयोरिति हेमचंद्रः ॥ बृहति
२९५ ॥ बृह वृद्धौ ॥ महति ॥ मह पूजायां ॥ वर्त्तमाने पृषद्बृहन्महदिति निपात ॥ पृथुत्वमस्यास्तीति सिध्मादित्वात् लच् ॥ पृथुलं ॥ लाति
ति वा ॥ ६० ॥ वलते ॥ वल संवरणे ॥ संचरणे च ॥ विकुलमन्यशापीति रक् ॥ स्त्रू ज्ञादय इति कः इति मुकुट ॥ तन्न ॥ उज्ज्वलाद
त्वाद्वग्बदर्शनात् ॥ डलयोरेकत्वस्मरणं ॥ करणीति ॥ कण ॥ ग्रह आच्छादने ॥ महतीति स्थूच्चे तिकु प्रत्ययः ॥ नुलो प्रत्ययस्तु
लोपः ॥ क्रम्बश्च ॥ विपोलति ॥ पुल महत्वे ॥ इगुपधेति कः ॥ विपुलः ॥ पृथु तेगाधे मेकपास्त्रीम स्थूधेरे इति विश्वः ॥ भवप्यायते

विशंकटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥ वद्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे ॥ ६१ ॥

स्म ॥ ओप्यायी वृद्धौ ॥ गत्यर्थेति क्तः ॥ ओदितश्चेति नत्वं ॥ ५ ॥ प्यायः पी प्यायते ॥ प्येङ् वृद्धौ ॥ ध्याप्योः संप्रसारणं चेति ॥ राम
छुति प्र ॥ स्त्रियां च तोरवेति ङी तौ स्थूलयति ॥ स्थूल दंडणे ॥ अच् ॥ इति ङी त्रौ ॥ स्थूलयंति ॥ स्थूलं दंडणे ॥ अच स्थूल पी २९५
ते जडे इति हेमः ॥ प्यायते ॥ छुलरि ति निपात ॥ पीवरः स्थूलकर्मयोरिति हेमचंद्र ॥ चत्वारि ॥ स्तुचते ॥ स्तुच प्रसादे स्त्र
न्यं क्कादिः स्त्रूयते वा ॥ वाकुलकारकं ॥ कः ॥

स्तोक ॥ स्त्रियष्ट्येषा तके स्तुमान् ॥ क्षल्यते वार्यते ॥ अलभ्रपरावे ॥ बाऊलकात्वयः ॥ बाऊलकास्तु ऊकः ॥ क्षोदनं क्षुदिसं
पेषणे ॥ सं पदादिः ॥ स्तुदंतादि ॥ क्ष्मातोनुपेतिकः ॥ तोर्लिस्वार्थेकन् ॥ यद्वा ॥ क्षुद्यतेस्म ॥ स्फायितंचीतिरक् ॥ रलयोरेकत्व
स्मरणात् ॥ कपिलिकादित्वाल्लत्वं ॥ क्षुल्लकस्त्रिषुनीचेल्पेइतिविश्वः ॥ सीव्यते ॥ श्लिष्यतिवा ॥ श्लिषुआलिंगने ॥
॥ श्लिपेरमोपधायाइतिकन् ॥ सूच्यते ॥ सूचपैशून्ये ॥ सूचेस्मन् ॥ सूक्ष्मंस्यात्कैतकेध्यात्मेपुंस्यणौविति शुच्यात्म
के इतिविश्वः ॥ दभ्यते ॥ दंभुदंभने ॥ स्यास्फायितंचीतिरक् ॥ कृशातनुकरणे ॥ फक्कत्स्तीवेतिसाधुः ॥ तन्यते ॥ तनु

